1057

संख्या

॥ मंत्रार्थप्रारंभपत्र १॥ २५ नं० ५२

अष्टश्लोकीव्याख्या पत्र -25

उपमन्युसून

14" X 6"

मा

मं० ॥१॥ श्रीमते रामानुजाय नमः ॥ यः पार्थस्य कृते निरंकुशात् निजस्वातंत्र्यभूषायितं सारथ्यं प्रथयांचकार ध[रणी]भारावतार
रक्षणं मायाश्रितवैरिणीव्यघटयच्चक्रेण यः शौरी दृग्घोदृग्घदयापयोनिधिरसौ देवः प्रभां शेमुषीश्री शठरिपुगुरुकरुणाल
ब्धत्रय्यंतयुग्[...]मतत्वार्थः श्रीमान् गोविंदगुरुः कौशिकवंश्याब्धिकौस्तुभो जयति तत्पादपद्मयुगसेवासंप्राप्तनिखिलनिग
मांतः वितनोम्यष्टश्लोकीविवृत्तिं सौम्योपयंतृदासोहम् श्रियः पतिः परमकारुणिको भगवान् सर्वेश्वरो वैकुंठेतु परे लोके श्रिया ता
सार्द्धं जगत्पतिः आस्ते विष्णुरचिंत्यात्मा भक्तैर्भागवतैः सह इत्युक्तरीत्या वैकुंठाख्ये दिव्यलोके दिव्यमणिमंडपे शेषपर्यंके श्रीभू
लीलाभिः सह नित्यसूरिभिरनवरतपरिचर्यमाणचरणनलिनो जगत्सर्वमेकातपत्रं प्रशासीनो नित्यसूरिवद्देवस्सर्वेषामपि चेतना
नां स्वशेषत्वाविशेषेण स्वगुणानुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपस्वचरणारविंदनित्य प्रीति
कैंकर्यापरमपुरुषार्थानुभवयोग्यतासद्भावेऽपि अनादिमायया सुप्तान् अचिदविशेषितान् प्रलयसीमनि संसरतः करणकलेव
रैर्घटयितुं दयमानमनाः इत्युक्तरीत्या कतिपयान् जंतून् मधूच्छिष्टमग्नसुवर्णबिंदुवत् प्रलयसमये त्रिगुणात्मकप्रकृतिनिम॥
ग्नान् भोगमोक्षशून्यान् चिद्विशेषान् अवलोक्य संततदयार्द्रचित्तस्सन् विचित्रा देहसंपत्तिरीश्वराय निवेदितुं पूर्वमेव कॢप्ता तावत्[...]न्
हस्तपादादिसंयुक्ता इत्युक्तरीत्या स्वचरणारविंदपरिचर्यया तानुज्जीवयितुं तदुपयोगीनि करणकलेबराणि तेषां प्रदाय [...]ते षु कर
णकलेबरेषु विषयांतरप्रवणेषु हंत तमस्सदसत्त्वा च विवेकुं ईशो मानं प्रदीपमिव कारुणिको ददातीत्युक्तरीत्या हेयोपादेयविवेका विवे
य सांगोपांगवेदांताख्यं शास्त्रं प्रवर्त्तयामास तस्मिंश्च शास्त्रे तैरज्ञानान्यथाज्ञानविपरीतज्ञानैरन्यथानीते सति शरीरसंरक्षणे शारी
रिण इव स्वशेषभूतचेतनसंरक्षणे स्वप्रयोजनत्वाध्यवसायेन तेषु परमकृपया सकलशास्त्रार्थसंग्रहेण प्रकाशयितुं कामः सिद्धं सत्सं
प्रदायेऽस्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं सत्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतं दंभासूयादिमुक्तं जितविषयगणं दीर्घ १
ता बंधुं दयालुं स्खलिते शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् १ सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी शुश्रू

शुश्रूषमाणः प्रणिपतनपरः प्रश्नकालप्रतीक्षः शांतो दांतोनसूयुः शरणमुपगतः शास्त्रविश्वासशाली शिष्यः प्राप्तः परी
क्ष्यां कृतविदभिमतस्तत्वतः शिक्षणीयः इत्याद्युक्तशिष्याचार्यस्वरूपं लोके प्रदर्शयितुं बदरिकाश्रमे नरनारायणात्मनात्मस्वय
मेव शिष्यतया चार्यतया चावस्थाय चेतनस्वरूपयाथात्म्यप्रतिपादनपरं श्रीमदष्टाक्षरं मंत्रं प्राचीकशत् पुरा मंत्ररत्नं द्वयं ब्रह्मन्वि।
ष्णुलोके महापुरे तस्मिन्नंतःपुरे लक्ष्म्यै मयादत्तं सनातनं लक्ष्मीलब्धं तया चैव मंत्ररत्नं द्वयं विभो इत्युक्तरीत्या विष्णुलोके।
स्थित्वा स्वरूपयाथात्म्यानुरूपोपायोपेयप्रतिपादनपरं द्वयाख्यमंत्ररत्नं प्राविरतनत् तदनु द्वापरयुगे भूभारनिर्हरणाय ब्रह्म।
णा देवकीपुत्रो रत्नकरीत्या देवकीतनयात्मनावतीर्य शरणवरणोचितवात्सल्यस्वामित्वसौशील्यसौलभ्यादिगुणपूर्ण
पिशुनं पार्थसारथ्यं सकललोकसाक्षिकमाचरन्नेव स्वरूपयाथात्म्यानुरूपपरमपुरुषार्थप्रतिपादनपरं चरमश्लोकं प्रावि
वतत् एवं भगवता प्रवर्तिते पिरहस्यत्रये गृहकलहमंकुरितमवलोक्य मौग्ध्यजनभागधेयपरिपाकवैभवभावितपरमकारुणिक
भगवद्वचनारोपणवान् समस्तचापलककुदृष्टिनिरसनसत्वेवेदांतविद्याविस्तरणविकीर्षया लक्षितरेशावतारभगवद्यतिवर।।
व विजयकालकृतारतयाकरत्नामलकीकृतसंप्रदायिकरहस्यार्थतत्वो भगवान् श्रीमत्पराशरभट्टार्यः सकलचेतनोज्जिजीविष
या सकलशास्त्रसंग्रहत्वेन सर्वदा मुमुक्षुभिरनुसंधेयस्य रहस्यत्रयस्य नाथयामुनयतिवरप्रभृतिगुरुपरंपराप्राप्तमर्थविशेषमष्टभिः।।
श्लोकैर्विवरितुकामः प्रथमस्वरूपज्ञानपूर्वकत्वात् तदभीष्टोपायस्वीकारस्य स्वरूपयाथात्म्यप्रतिपादनपरं श्रीमदष्टाक्षरमंत्रं चतु
र्भिः श्लोकैर्विवृणोति तत्र सकलवेदसारसंग्रहः प्रणवः तद्विवरणं मंत्रशेषः इत्यकारस्य नारायणपदेन उकारस्य नमसा मकारस्य
नार पदेन विवरणात् तथाहि स्मर्यते ऋचो यजूंषि सामानि तथैवाथर्वणानि च सर्वमष्टाक्षरांतस्थं यच्चान्यदपि वाङ्मयं १
व अक्षरस्तु प्रवणे अकार प्रणौ स्थितिः आद्यं तु त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता २ स गुह्योन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् उंका
रप्रभवा वेदा उंकारप्रभवाः स्वराः उंकारप्रभवं सर्वं जगत्स्थावरजंगमं इति तद्विवरणं द्वयं मूलमंत्रे संगृहीतोक्तस्योपायोपेयस्व
रूपस्य विविच्य प्रतिपादनात् तद्विवरणं तु चरमश्लोकः तदपेक्षितप्रापकांतरपरित्यागस्य सर्वपापविमुक्तेश्चाभिधानात् ३।।

मं· उक्तार्थविशदीकारयुक्तार्थांतरवर्णनं मतं विवरणं त्वत्र महितानां मनीषिणामिति विवरणलक्षणमभियुक्तोक्तमिहानुसं-
२ धेयं अतः सर्वसंग्रहभूतं श्लोकमादौ विवृणोति अकारार्थो विष्णुरिति श्लोकेन अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृन्मका-
रार्थो जीवस्तदुपकरणं वैष्ण[वमिदं] उकारोऽनन्यार्हनियमयति संबंधमनयोस्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् १ अत्र
ग्रंथस्याकारार्थ इत्यकारोपक्रमात् ग्रंथादौ निर्विघ्नपरिसमाप्तिप्रचयगमनार्थमवश्यकर्तव्यं मंगलाचारयुक्तानामित्यादिशिष्ट-
स्याचारसिद्धं मंगलमप्याचरितं भवतीति तदाहुः अ इति भगवतो नारायणस्य प्रथमाभिधानमभिदधता किं नाम मंगलं न कृत-
मिति अर्थशब्दोपादानादपि मंगलाचरणसिद्धिः अर्थशब्दोऽपि पुरुषार्थवाची जगदुदयरक्षाप्रलयकृत् उदयो निमित्तनैमि-
त्तिकप्राकृतरूपेण त्रिविधा उत्पत्तिः रक्षा अनिष्टनिवर्तनपूर्वकेष्टप्रापणरूपं मातापितृमनुलोकपालनरपतिविष्णवतारादि-
भिः क्रियमाणं बहुविधं रक्षणं प्रलयो निमित्तनैमित्तिकप्राकृतात्यंतिकरूपेण चतुर्विधो लयः जगतां लोकानां उदयरक्षाप्रलया-
न्करोतीति तथोक्तः यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति॥
हंताहमिमास्तिस्रो देवता अनेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणि एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यौ
श्री द्यावापृथिवी नापो न नक्षत्राणि अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति नारायणात्प्राणो जायते मनः सर्वेन्द्रिया-
णि चेत्यादिश्रुतेः विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितं स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः एवं सृज्यः स च सर्गकर्ता
स एव पात्यत्ति च पाल्यते च ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा कृ-
ष्ण एव हि लोकानामुत्पत्तिरपि चाव्ययः इत्यादिस्मृतिश्च अनुसंधेया एवंभूतो विष्णुः व्यापनशीलः श्रीमन्नारायणः विष्लृ व्या-
प्ताविति धातुः अकारार्थः अकारस्य वाच्यः अयमाशयः गतिरक्षणहिंसाद्यनेकार्थकादवतेर्धातोरेतदर्थत्रयविवक्षायां अ-
न्येषामपि दृश्यत इति डप्रत्यये टिलोपेन कृत्स्नधातुलोपे प्रत्ययाकार एवावशिष्यमाणोऽनुप्रधातुर्वा अमर्षेऽत्र यंत्रकृत्यालक्षणया
वा प्रतिपादयति तत्रोदयस्य चेतनानां स्वस्वपुण्यापुण्यकर्मानुगुणभगवदत्तकरणकलेवरप्राप्तिरूपत्वात् धातोर्विसर्गेऽपि वि-
२

द्रूपा अकारस्योपपकर्तृवाचकत्वं ॥ रक्षणार्थविवक्षया रक्षाकर्तृवाचकत्वं ॥ चेतनरहितदेवमनुष्यादिस्थूलशरीरा
णां ॥ पृथिव्यप्सु प्रलीयते इत्यादि उक्तक्रमेणानमः शब्दवाच्यायां प्रकृतौ प्रलयकरणस्य हि सारूप्यात् हिंसार्थविवक्षया प्रलयक
र्तृवाचकत्वं सिध्यति ॥ पद्यागपगताविति गतिसामान्यवाचीनो ष्ययतेर्धातोरूत्तमतिष्ठितिनाशपर्याय देवमनुष्यादिकरण
नि कलेवरप्राप्ति रूपनिष्पत्तिरूपं वेक्षप्राप्तिरूपगतिविशेषविवक्षयां कर्तरि क्विपि लोपो व्योर्वलीति यकारलोपे कृते
त्य पूर्वस्य पः लोपे आगमविधेरनित्यत्वात् नुगभावे च अ इति रूपं सिध्यति ॥ अत एव शाबरभाष्ये प्रमाणमप्यतिवा
कोपि प्रमाणशब्दस्य एवं तत्वं न साधीय इति मन्वाते भट्टपादैः प्रमाणमपते इति अप पतिधातु निष्पन्नाकारप्रश्लेष
कल्पनया साधुत्वं समर्थितं ॥ नन्वेवं जगदुत्पत्त्यादिकर्तृत्वं भगवतो न सिध्येत् ॥ सर्वेषामुत्पत्त्यादिकर्तृत्वमेव तु सिध्येत्
नहि देवदत्तो गच्छतीत्युक्ते अन्यदीयगतिकर्तृत्वं सिध्यतीति चेत् ॥ तर्हि सिद्धान्तः समीहितं चिदचिद्वस्तु शरीरकं ब्रह्मैव
हि कार्यकारणोभयावस्थं जगत् ॥ तत्त्वमसि ॥ इदं सर्वं यदयमात्मा ॥ अयमात्मा ब्रह्म सर्वं खल्विदं ब्रह्म ॥ ब्रह्म
दासा ब्रह्म दाशाः ॥ ब्रह्मैवेमे कितवा इत्याद्यभेदश्रुतेः ॥ नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति का
मान् ॥ इत्यादिभेदश्रुतेः ॥ यस्यात्मा शरीरं यस्य पृथिवी शरीरमित्यादि घटकश्रुतेः ॥ नेह नानास्ति किंचनेत्या
दिव्यतिरिक्तनिषेधश्रुतेश्च प्रतिज्ञादृष्टान्तानुरोधात् ॥ अभिध्योपदेशात् साक्षाच्चोपदेशात् आम्नानात् ॥ आत्मकृतेः
ना योनिश्च गीयते ॥ एवं च सर्वाभिन्नजगदुत्पत्त्यादिकं तत्कर्तृत्वं भगवत एवेत्यभिन्ननिमित्तोपादानत्वं भगवतः सिध्यति ॥ अ
पंच अकारा योगनिरूढः ॥ तत्र योगेन तस्य जगदुत्पादिकर्तृवाचित्वं ॥ रूढ्या तु विष्णुवाचकत्वमिति ॥ अन्ये यो वेदादौ
स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ परवाच्यत्वेन प्रधान इत्यर्थः ॥ स्तमस्त ३

मं॰ शब्दमूलत्वादकारस्य स्वभावतः समस्तवाच्यमूलत्वात् ॥ ब्रह्मणोपि स्वभावतः ॥ वाच्यवाचकसंबंधः ॥ तयोर
३ र्थाः प्रतीयते ॥ अकारो विष्णुवाचकः ॥ अ इति भगवतो नारायणस्य प्रथमाभिधानमित्यादिकं ॥ अकारस्य
विष्णुवाचित्वे प्रमाणमनुसंधेयं ॥ ईश्वरस्य चेतनसंरक्षणादक्षायां पुरुषकारसन्निधेरपेक्षितत्वादविनाभा
वाच्च ॥ अकारेण लक्ष्मीसंबंधोप्यनुसंधेयः ॥ अनन्या हि मया सीता भास्करेण प्रभा यथा ॥ अनन्या राघवस्याहं भा
स्करस्य प्रभा यथा ॥ राघवत्वेभवत्सीता रुक्मिणी कृष्णजन्मनि ॥ अन्येषु चावतारेषु विष्णोरेषानपायिनी इत्यादिवच
नात् ॥ अथ तृतीयपदं व्याचष्टे मकारेति ॥ जीवः बद्धमुक्तनित्यरूपेण त्रिविधश्चेतनो मकारार्थो मकारवाच्यः ॥
अत्र जीव इत्येकवचनं समष्ट्यभिप्रायेण नित्यो नित्यानामित्यादिश्रुत्या न त्वेवाहं जातु नासं ॥ दासभूताः स्वतः सर्वे ह्या
त्मानः इत्यादिस्मृतिभिश्च जीवानां स्वरूपबहुत्वोपपन्नेः मकारस्य पंचविंशाक्षरत्वात् जीवस्य च पंचविंशोयं पु
रुषः ॥ पंचविंशोयमात्मा भवति इत्युत्तरीत्या पंचविंशतत्वादात्मानुस मकारेण पंचविंशः प्रकीर्तित इति स्मरणाच्च
मकारस्य जीववाचित्वं ॥ अन्ये केचिदाचार्याः मकारस्य जीववाचकत्वानुगुणं रूपं साधयंति ॥ अस्य च्छंदे मं म
कारात्पूर्वोत्तरयोरस्त अपद इत्यनयोरवयवयोः ॥ छंदसे लोपे मकारव्यंजनमात्रं शिष्यते ॥ अस्य छ
न्दस्य प्रसंगात् मवाचित्वाद्वशिष्टस्य मकारस्य जीववाचकत्वमुपपन्नतरं भवति ॥ अस्मिन्पक्षे अस्य छ
न्दस्यैकवचनप्रातिपदिकावस्थायां मकारात्पूर्वोत्तरयोरवयवयोर्लोपे पिएकदेशविकृतमनन्यद्भवती ३

तिन्यायेन अस्मच्छब्दत्वानपायात्॥ त्वाद्युत्तमौ सत्यां ख्याहौ साविति सूत्रेण प्रकृतेरस्मदि॥
त्यादेः ङि प्रथमयोरमिति विहितो रमादेशाश्च प्रसज्येते॥ पुमांसुप्रलुगिति सुपो लुकि च कस्यमा॥
म नेमहो रवं॥ सुवंतत्वावस्थायां त्वह मितेन स्वरूपमिति मकार एवासिद्धः॥ त्वाद्युत्तमनंतरं प्रकृतिप्रत्य॥
ययोर्विकारांतरापत्तेः॥ प्रागेव मकारातिरिक्तस्यस्त्हैव विभक्त्यावयवस्य लोपे सति तु नमः शब्देम॥
ष इति जीववाचक मकारात् प्युत्पत्तसंभव इति दोषमनुसंधाना केचिदाचार्याः॥ मनज्ञाने मसि
परिमाणे मदीहर्षे इति धातु भ्योडि प्रत्यये टिलोपे ह्रस्वस्य प्रत्ययलोपे च धात्ववयवभूतमका॥
राणां शिष्यमाणानामिह तंत्रेणोपादानं॥ तथा च ज्ञातृत्वाणुपरिमाणत्वानंदगुणकत्वादिविशिष्ट॥
वस्तुवाचिनो मकारस्य तद्वोजीवत्वावार्थः प्रवृत्तिनिमित्ताश्रयस्य शब्दवाचकत्वादित्याचक्षते॥
य अस्मिन्नपि पञ्चोङि प्रत्ययस्य [illegible] लोऽणादिषु वा केचिदप्यनुशासनमदर्शनात्॥ संज्ञासु धातुरूपाणि
प्रत्ययाश्च ततः परे॥ कार्याद्विद्यादनूबंधमेतच्छास्त्रमुणादिषु॥ इति कस्मैणादिपद्वाश्रयत्वेपि
मकारात्त्वाद्युत्सन्नो सो नो धातोरिति सूत्रेण मस्य नकारादेश प्रसंग इति दोषं पश्यत एवं प्रत्ययस्य
दाचार्याः॥ अस्मच्छब्देऽनोदेविषयेन मनादेशाभिलापाद्विभ्युरवयव लोपस्य दुष्प्रत्वात्॥ अस्मा

सखं ऽनमोन्वितसमर्तऽनमः पदग्रनेनस्मरणात्वप्रतिपादकेसाधुविद्यात ॥ तथाचनमः पदार्थानुसंधानेननभगवानेवममरक्षकोना
८ हमितिवुध्यासाधनांतरेभ्योनिवर्त्ततेइति ॥ भावःसाधनांतरप्रबलोतु पाश्चित्तिरियंसात्रयत्नुनःस्मरणंवृजेदिति ॥ विहितपूर्वप्रपदन
स्मरणरूपंप्रायश्चित्तमनुष्ठेयमितितात्पर्यं ॥ चकारसागवंडाखंऽनमसोरितरेतरयोगंप्रतिपादयति ॥ वंधवएववोधवाः ॥ वांधवा
इवाभासंतेइतिवोधवाभासाः आपधरक्षकाः सेषदिसर्वस्वापहारिणः शरीरसंवंधिन सुलोजरूपासक्तस्चेत ॥ लोजेइसनेनरूपस
वतेषुप्राचार्यं ॥ ननुतेषु स्मिन्निति स्यचितं तदानारायणत्वंनारायणेत्यास्याप्रसिद्धिर्यस्यतंतयो क्तेशाब्दंसाधुविद्यात ॥ चतुर्थ्यां
पृथगनुसंधेयलस्यवक्ष्यमाणत्वात ॥ अत्र प्रातिपदिकमात्रस्यविभज्यकथनार्थमाव्याशाब्दः अतएवशाब्दइत्युक्तंनतुपदमिति ॥ वि
भक्त्यंतंहिपदं ॥ तथाचनारायणशब्दो मातापितृभ्राता निवासःशरणंसुहृदितिसुकरीसानिरूपाधिकसकलविधवंधुत्वंभगवतःप्र
तिपादयतिइति तदर्थानुसंधानेन देहानुवंधौपाधिकवंधुषुवुद्धेर्लोताविवर्त्तते ॥ ननुकथंनारायणपदेनभगवत्सकलवि
धवंधुत्वप्रतिपादनमितिचेदुच्यते ॥ तत्पुरुषसमासेकर्त्तरि ल्युडंतेनायन

२
३ जिवधतोरहेदेनत्तत्रात्मापुरुषः ॥ पंचविंशात्मामवतिद्व्यादिषुतस्यजीवेप्रसिद्धिप्रातु
र्यात्सत्रतत्रैवमकारव्यतिरिक्तपूर्वोत्तराव यवलोपेसति मकारव्यंजनमात्रंशिष्यते ॥ तस्मान्साधु
स्यतो हलस्त्यादिलोपः ॥

एवा मो

चतु रो

वि ति

~~मकारस्यं तत्त्वमात्रं शिष्यते॥ तस्या साधुमतो स्वस्त्यादिदोषः~~॥ धातुमकारत्वाभावाच्च नन्वनकारादेशः। न पाच्च नित्योऽतिस्थानी ए
वोऽरुणः पात्मा च तस्या वेदितव्यः॥ उपत्रापं पुरुषः स्वयं ज्योतिः॥ ज्ञानात्मैवायं पुरुषः॥ प्राप्यानंतकर्मणः स्तस्य पत्नि चेतत्करोत्ययं तत
योऽस्य विष्यन्नेश्चाद्गृह्य। यस्याश्मिन्नंतमंतरेण॥ यस्यात्मा शरीरं॥ रस ह्येवायं लब्ध्वानंदी भवति॥ विज्ञानं यज्ञं तनुते॥ निर्वाण
मयमेवात्मा ज्ञानमयोऽमलः इत्यादिश्रुतिस्मृतिसिद्ध नित्यत्वाणुत्वरूपप्रकारान्॥ ज्ञातृत्वकर्तृत्वभोक्तृत्वपरमात्मशेषत्वतत्परतंत्र॥
त्वानंद गुणकत्व ज्ञानानंदस्वरूपत्वलक्षणं मत्वा॥ उपलक्षणं चैव तिनिमित्तमकारस्यापि तादर्थ्यात्मवाचित्वमवगन्तीति पंच
मकाश्चेमद् तिष्ठतिविमत्तिरपि मकाराद्युत्पद्यते॥ अर्थात्मा तु समकारेणोत्पादिस्मृतौ॥ उपात्मानादेनमकारार्थवत्वथमम्पतीवस्वर
संभवतीति॥ अथ पा कारोपरिस्थिततां लुप्तचतुर्थी व्याचष्टे॥ तदुपकरणमिति विभक्तोर्जातिवैशिष्ट्यं॥ इदं मकारवाच्यमात्मवस्तु उ
पकरणतास्वरूपेशेषानुबंधव निर्दिष्टा॥ तदुपकरणं॥ तस्याकारार्थस्य विशेषस्य करणं शेषभूतं वैशिष्ट्यमिति॥ उपनेनतदेषणेन
जीवस्य भगवच्छेषत्वे हेतुरुच्यते॥ सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत॥ मतः सर्वमहं सर्वमित्यादिश्रुतिस्मृति भुत
स्तवतः स्वतंत्र नत्वैतच्छेषत्वप्रतिपादनात्॥ यथा च किंचित्साधनं तेन किंचन संबंधस्यावपतिपालपादितिश्रुतं ततिचस निति
मन्त्यादृष्टेः उपयमस्य स्ते स्वरूपस्वामीति निश्चिनोति तद्जगत्सृष्टिस्थितिसंहारव्यापारैरयं जगच्छेषीति निश्चेतुं न क्षमिति
दर्थ प्रतिपादकं तु विडोपनिषद्भाष्यकारस्स्फुटं दर्शनं च॥ नत्वैवं नजामते मिमिपते वाविपश्चित्॥ अजो नित्यः शाश्वतोऽयं पुराणो
इत्यानात्माश्रुतिनित्यचेतनाभ्यासांत्विप्रुतिस्मृतिन्याय विरोधात्। तत्र विपदादेरिव नामान्तरभजनार्हस्वरूपान्यथाभावात्मकोत्प
त्यादेरेव प्रतिषेधात्॥ ज्ञानसंकोचविकासात्मकस्वभावान्यथाभावापत्तिरूपकार्यत्वस्य स्वरूपनित्यत्वाविरोधित्वात्॥ यथा
चैतत्तथा शारीरकभाष्ये स्फुटं॥ यद्वा ततउपकरणमिति पदच्छेदः॥ तत्र मकारवाच्यमिदमात्मवस्तु वैशिष्ट्यं विभुसंबंधि उपकरण

नाथमुक्तं ॥ २ ॥ परस्मिन्न्योजनाद्धृदये पित्नीव शेषस्य विहृत्यस्तु न स्य भगवच्छेषत्वमर्थसिद्धं ॥ २ ॥ पचपदात्मकारवाक्यं चैतन्यवस्तुरन्तं द्रोणमो
गस्थाननैगोपकूरणेत पोपस्त्विन शुद्धसत्त्वमिश्रसत्वशून्यरूपेण त्रिविधं धनविदूस्तु वैसव भुवकरणमिति योजनान्ने त्वचेतनस्य क
थं भगवद्धन्त्याहेरोषता ॥ तद्धि भगवद्धन्यस्य चेतनस्यापि शरीरैर्द्र्यापातमनाशेषभूता ॥ २ ॥ पतएवंद्वासुपर्णासयुजा सखायासमानं वृक्षं स
मिति ॥ समाने वृक्षे पुरुषो निमग्नइति चेतनशरीरस्याचेतनस्य जीवस्य रो यस्याधारं एयपक्षपतेइति ॥ उच्यते ॥ २ ॥ पचेतनमपि हि चेतनदेवभगा
वतए वली लोपकरणतया ॥ २ ॥ पनत्याहि शेषभूतं चेतनशेषत्वे तु तस्य कर्मोपाधिकृतं चेतनाम्ना दिजन्मार्जितपुण्यपापरूपकर्म
गुणेन भगवत्कैंकर्यं भोग्यभोगोपकरणभोगस्थानतामापाद्यैव हि भगवतो लीलारसं निष्पादयेति ॥ पश्चाच्च रागद्वेषवत्तावि
चेतनस्यापरावाधानुरूपफलभोगस्थानतयाः पवरस्थितमविराजएवतु पतन्त्याहि शेषं ॥ तद्धलं ॥ २ ॥ पतएवसवासनाकर्मनिवृत्तौ ते
नामविस्संबन्धो निवर्तते ॥ भगवतस्तु न कदाचिदपि तत्संबन्धनिवृत्तिरुभयलिंगतयानुतस्य तत्संपर्कं कृतहेयसंबन्धइति ॥ वैप्रत
मिरसिस्सरैनंतरं किन्तु सर्वत्र तुल्यो ग्रहेति शेषः ॥ २ ॥ पद्मयिनमम भगवतएवाहमस्मि ॥ यस्यास्मि नतमंतरेमितरैं ॥ यस्यात्मा शरी
रंस्वत्वमात्मनि संजातं स्वामित्वं ब्रह्मणिस्थितं ॥ दासभूता ॥ स्वतस्सर्वे ह्यात्मानः परमात्मनः ॥ कस्मस्य हि कृते मर्त्ये भूतमिदं वि
श्वं चराचरमित्यादिश्रुतिस्मृतिशतं ॥ परास्तु तत्कृते हि तत्त्रोषत्वकाष्ठाभूतं पवेत्यप्रतिपादके भगवद्वादश्यामे सर्वं चास्मि
न्नर्थे प्रमाणान्यनुसंधेयं ॥ २ ॥ पवं भागवतशेषत्वमंतरेण भगवच्छेषत्वासिद्धेर्भीताः पूर्वशेषत्वमप्यर्थसिद्धं ॥ २ ॥ परस्मिन्नर्थे न्यग्रोध
वीजे वटवत्सूक्ष्मएवेमाष्टुज्ञातता सिद्धे तंदीपशेषत्वे सर्वोप्यर्थस्संमवतीति ॥ ममममद्धलं तत्के पुत्रीतिश्[illegible]धिकारत्र ॥ [illegible] परिचारक
सम्मत्तेत्यादीनि उपबृंहणवचनानि भक्तदीपानि श्रीमत्पञ्चरात्र ॥ २ ॥ पस्मस्य धिगतेर्पि स्वदास्त [illegible] शेषत्वमित्यादि
श्रीपरकालसूरिसूक्तिष्व प्रमाणान्यनुसंधेयानि ॥ ननु कथमत्र चतुर्थ्याः प्राप्तिः [illegible] तस्य लोपः उच्यते ॥ ब्राह्मणे

६

त्वामहसेऽयोमित्यात्मानं युञ्जीतेत्यनुष्टेयार्थप्रकाशके मंत्रेऽप्यकारार्थस्य बृहत्त्वाद् ततिचतुर्थ्यं तेन बृहत्त्वशब्देन तु तं त्वा तु॥
ऽऽप्यकारविवरणपरेण नारायणपदे तादर्थ्यचतुर्थीदर्शनाच्च॥ नारायणपदसंग्रहादकारादपि तादर्थ्ये च तुर्थी व तं व्य
तिवार्तिके न शेषत्वापरपार्यायेतादर्थ्यचतुर्थीप्र॥ न्तासा च प्रणवस्य छंदोरूपत्वात् सुपां सुलुक पूर्वसवर्णेत्यादि सूत्रेण
छंदोविषयेण लुप्ता अथ उकारार्थमाह उकार इति उकारोऽवधारणार्थः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः तदे
व भूतं तदु भव्यमाहहुमित्यादिष्वेवकारस्थाने उकारस्य प्रयोगात् तेन उकारः ऽन्यनयोः मकाराकार[illegible]वाच्ययोः जीवपरमात्म
नोः संबंधः शेषशेषिभावरूपः ऽनन्यार्हः ऽन्येषां भगवद्व्यतिरिक्तानां ब्रह्मरुद्रादिदेवतांतराणां देवतांतरमंत्राणां तरसाधनांतर
प्रयोजनांतरपराणां देहात्माभिमानिनां स्वस्वातंत्र्याभिमानिनां चेतनानां तच्छेषभूतानां चेतनानां च अर्हः योग्यो न भव
तिय(?)यात् यानियमयति शिक्षयति ऽत्र देवर्षिभूतात्मनृणां पितॄणां न किंकरो नायमृणी च राजन् सर्वात्मना यः शरणं ज
शरण्यं नारायणं लोकगुरुं प्रपन्नः कमलनयनवासुदेवविष्णोः स्वपुरुषमभिवीक्ष्य पाशहस्तमित्याद्यनुसंधेयं
केचिदाचार्यास्तु अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा लक्ष्मणस्तु धनुष्पाणिः पृष्ठतोऽनुजगाम ह इत्यकारोऽस्या रामः
लक्ष्मणयोर्मध्ये सीतावस्थानवत् तद्भर्तुर्रामस्य प्रजाया आंदोलिकावांत रामानुरवस्थानवच्च अकारमकारमध्ये उकारे
ण लक्ष्मी रूच्यते तथा च लक्ष्मीशेषत्वमपि शास्त्रमेव अकारेणोच्यते विष्णुरित्यादिस्मरणादित्याह अस्मिन्पक्षे अव
धारणमर्थसिद्धं अपभक्षो वायुभक्ष इत्यादिवत् भगवदादिशेषत्वादपि अन्यशेषत्वनिवृत्तेरेवावश्यकत्वेन प्राधान्यात्ता
दवधारणार्थत्वमेव युक्तमिति तु संप्रदायः एवं प्रणवस्य पदार्थानुक्त्वा अथ प्रणवस्य स्वरूपकथनपूर्वकं तस्य वाक्यार्थमा
ह त्रयीसार इति त्रय्याः ऋग्यजुस्सामरूपवेदत्रयस्य सारः स्थिरांशभूतः त्रीण्यक्षराण्यात्मा स्वरूपं यस्य सः आत्मा अकार
उकारमकाररूप इत्यर्थः तथाहि श्रूयते भूरिति ऋग्वेदादजायतेत्यादि अकार उकारो मकार इति तानेकधा सम

५ मे ॥ मंवत्त तदेतदोमितिचतथा चमनुरूपकारं चाप्युकारं च मकारं च प्रजापतिः ॥ वेदत्रयान्निरवृहद्भूर्भुवस्वरितीतिवेति ॥ तथा चाकारोकारयोः
संध्यक्षरे हेतने ॥ ॐमितिप्रणवस्वरूपं सिध्यति ॥ इदमेव संधिकरणमभिप्रेत्य ॐमित्येकाक्षरं ब्रह्मेति इत्र स्त्रे प्रणवस्यैकाक्षरत्वप्रसि
द्धिरपियं तु पाणिनेरपि दिष्टं भवति ॥ ष्टिलोपश्चेति सूत्रेण ३ पदरहस्य इतिधातोर्मनप्रत्ययमुपाद्यतस्य पिलोपे छोरू ऊनुना सि
द्धेनेत्र टा दीर्घत्वे च ॐ ॥ ओमिति प्रणवस्वरूपनिष्पादनं तत्र मण च स्वरूपस्याख्यानमात्रपरत्पानोमार्यंत्रपपराक्षरस्त्रयसमुदायरू
पत्वाचकुरुत्र तिस्मृतिसिद्धा निरूपणद्विरूधानमपि वा विरोधाधिकरणन्यायेन बाधीष्यते ॥ एवंरूपः प्रणवः ॥ तं कारादिसंपूर्वोत्तरं ३ पर्थे चेत
नो भगवदनन्यार्हशेषत्वे वं स्व ३ पर्थसमदिराव ॥ सम्यगदिक्षालमुरुत्वचत्वात्प्रत्ययादपदिस्वर्थः ननु ३ ओमित्येकाक्षरं ब्रह्मेत्यस्य
नरैः त्रिमात्रेणैव मित्यनैवाक्षरेण परं पुरुषमभिध्यायत ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरतित्यादिवाक्यपर्यालोचनया प्रव।
स्यवस्य ब्रह्मपरत्वं प्रतीयते ॥ कथमनतस्य जीवः परमात्मशेषइत्येतदर्थप्रतिपादनपरत्ववर्णनं ॥ तथाहि जीवप्राधान्यप्रणवस्य प्रसज्यते
इतिचेत् मेवं राजपुरुषवाक्यवत् राष्ट्र प्राधान्येनजीवपरस्यापितस्य ३ पर्थप्राधान्येनब्रह्मपरत्वोपपत्ते ३ प्रयमेवार्थः प्रणवविवरणमन्त्रि
नमं त्रशेषेण मकारवाच्यो नारायणस्यैव शेषभूतः मम ने त्येवं शेषत्व निरूपसरूपपारतंत्र्यपर्यंतप्रतिपादनेन विशदीक्रियत इति
कृतो विमंत्रः ॥ चेतनस्य भगवदनन्यार्हशेषत्वप्रतिपादनपरएव स्यनुसंधेयः ॥ ४ ॥ एवं प्रणवं व्याख्याय ॥ ३ पथनमः पदं व्याचष्टे ॥ मंत्रब्र
ह्मणि मध्यमेन नमसा पुंसः स्वस्वरूपं गतिर्गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः ॥ स्वातंत्र्यं निजरक्षणं समुचितावृ
त्तिश्च नान्योचिता तस्यैवेति हरेर्विवेच्य कथितं स्वस्यापि नार्हं ततः ॥ २ ॥ इत्यादि ॥ मंत्रतारं त्रायत इति मंत्रा ते च भगवन्मंत्रा एवेति
वेदोक्तावयवार्थपौष्कल्यात् पांचालीपरिभवाज्ञामीलमरणद्वाहादिषु वाच्यनेरपेक्ष्येण भगवन्नामान्तवरदादक त्वं सुप्रसिद्धं ॥ तेषु बृ
हत्तरत्वेन त्रिमंत्रब्रह्मणि मंत्रराजे श्रीमदष्टाक्षरे भगवन्मंत्रा हि द्विविधाः ३ पव्यापका व्यापकश्चेति तत्र ३ पव्यापकाः मूल
मंत्रादयः तेषु साक ल्येन कल्याणगुणानामप्रतिपादनात् ॥ व्यापकेष्वपि स्तु विष्णुगायत्र्यां संग्रहीता नारायण वासुदेव विष्णु ५८

शीलत्वसमस्तकल्याणगुणानां प्रतिपादनात् तेषामपि नारायणमंत्रश्रेष्ठः अध्याहारनैरपेक्ष्येण तत्र कल्याणगुणप्रतिपाद
नात् इतरयोस्तु तत्प्रतिपादकार्थभगवदध्याहारस्यापेक्षितत्वात् विष्णुगायत्र्यां तस्य प्रथमपठितत्वादेव महर्षिदिव्यसूर्या
चार्यपरिगृहीतत्वाच्च एवमाद्यतिशयं द्योतयते ब्रह्मशब्दः तच्च ऋचो यजूंषि सामानि मंत्राणां परमो मंत्रः यथा सर्वेषु वेदेषु।
भूत्वोद्धृत्य बाहुरुच्यते सर्ववेदांतसारार्थः आर्ता विषण्णाः शिथिलाश्च भीताः नारायणेति शब्दोऽस्ति किं तत्र बहुभिर्मंत्रैः सांके
त्यं पारिहास्यं वा इत्यादि वचनशतमेतत्समानार्थाः श्रीपरांकुशपरकालगाथाश्चानुसंधेयाः मध्यमेन प्रणवनारायणप
दयोरंतरालस्थितेन देहलीप्रदीपन्यायात् पार्श्वद्वयान्वययोग्यतानेन विशेषणेन सूच्यते तेन द्वयोस्सखंडस्य नमो व्याव
प्तिः पुरस्तात् प्रणवे इष्टितेन ईश्वरादृष्टेस्तिरस्सं जातत्वाइष्टितं तेनान्वितेनेत्यर्थः सकर्मकात्तकर्त्तरि क्तप्रत्ययासंभवात् का
कालितौल्यद्योतनायेष्टितशब्दः नमसा नमः पदेन इष्टितमीक्षणं नपुंसके भावे क्तः तृतीया च करणे नमः पदं द्विविधं
अखंडनमः इति पदद्वयात्मकं सखंडं च तत्राखंडनमः पदमुपायवाचि गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभा इति मार्कंडे
येनोपदिष्टस्योपायस्य योपदेशमनुष्ठानप्रतिपादके द्रौपद्याः सहिताः सर्वे नमश्चक्रुर्जनार्दनमिति वाक्ये उपायवाचक
शरणपदस्थाने नमः शब्दप्रयोगात् सखंडनमः पदे मः इति षष्ठ्यंतं जीववाची नेति प्रतिषेधवाची अनयोर्द्वयोरपि नमस
सोस्सारूप्यात्त्वेनोपादानं अनेनैकपोशस्त्रणां आत्मत्वसारूप्यात्सखंडद्वारेण तत्र द्वयोर्नमसोर्मध्ये सखंडस्यैव नमसः
स्थलत्रयेप्यन्वयः तत्र प्रणवान्वितेन नमसा पुंसः चेतनस्य स्वरूपं प्रणवोक्तशेषत्वरूपं शिक्षितं शोधितं कथमिति चेत् उच्यते
ममता च द्विविधा अहंकारः ममकारश्च अहं ममेत्यहंकारः इदं ममेति ममकारः अहंकारश्च द्विविधः देहात्माभिमान
: स्वातंत्र्याभिमानश्च ममकारोपि द्विविधः देहात्माभिमानानां देहानुबंधिभोग्यभोगोपकरणादिषु ममेति बुद्धिः आत्मा।
तिशयाधायकेषु पारलौकिकफलतत्साधनेषु ममेति बुद्धिश्च तत्र देहात्माभिमानरूपोहंकारस्तदनुबंधी विषयमम
कारश्च प्रणवे प्रथितमकारेण ज्ञानगुणकत्वादिवाचिना मनो देहातिरिक्तत्वप्रतिपादनात् निरस्तौ स्वातंत्र्याभिमानानि
बंधन ममकारो द्विविधः पारलौकिकफलतत्साधनयोः स्वर्गस्वाराज्यादितत्साधनरूपेणैवं कल्पिततत्साधनरूपेण च द्विविध

म० त्वात्॥ तत्र कैङ्कर्यतत्साधनगोचरममकारो गतिशिष्टाणेन निरस्यते॥ कैङ्कर्यगोचरममकारस्तु गम्यशिष्टाणेन निरस्यते॥ स्वातन्त्र्याभिमानरूपोऽहं
६ कारस्वर्गस्वाराज्यादिगोचरममकारश्चात्र निरस्यते॥ अहं ममेति स्वातन्त्र्याभिमाननिवृत्तिरेवात्र स्वरूपशिष्टाणं॥ तुमचतुर्थ्या भगवच्छेषत्वप्र
तिपादितेषु कारणान्न शेषत्वनिरूक्तिरुक्तेऽपि पुरुपन्त्येष्यन्तमभूतस्य स्वस्य स्वार्थत्वरूपस्वातन्त्र्यनिरासेऽपि प्रथमान्तमकारोक्तात्त्वं व नाय
तत्कर्तृत्वाभिमतत्वात्॥ कर्तृत्वस्य च स्वतन्त्रः कर्तेति सूत्रासनेन स्वातन्त्र्यरूपत्वात्॥ स्वातन्त्र्यनिवृत्तिरूपं शोधनमिह कर्तृत्वं॥ तत्प्रकारश्चेत्सं
नमस॥ ॐ नमः इति प्रणवान्वये मः पापेवम॥ नेतिवाक्यभंगी लभ्यते ऽपन्नमः इति नादर्थषष्ठ्यास्व स्य स्वार्थत्वमात्रं कानेति निषेधेन स्वार्थत्व
रूपस्वातन्त्र्यनिवर्त्तते॥ एतत्स्वरूपं शोधितं॥ स्थानत्तु स्वरूपेनोपायत्वाविनारवण्डनमः। पदेनान्वितेन नमसा सखण्डेन गम्यते ऽनेनेति गतिरूपाय
शिष्टाणं कथमिति चेदित्सं स्वरूपशिष्टाणे स्वान्वयनिवृत्तिरूपं शिष्टाणं तत्प्रकारश्च सं॥ सखण्डेन नमसा न मो न मः सखण्डनमोऽन्वयेन मः मः नेतिवा॥
क्यभंगी भवति मम स्वरक्षणे यो प्रवृत्तिः य मम न किं तु भगवान् एवेति स्वरक्षणेऽप्युपकर्तृत्वरूपस्वान्वयनिवृत्त्या गतिः शोधिता पश्चान्नारायणे
पदान्वितेन नमसाऽखण्डेन गम्यं प्राप्यं कैङ्कर्यं शिष्टाणं कथमिति चेदुच्यते॥ भगवते कैङ्कर्ये स्वार्थत्वबुद्धिनिवृत्तिर्गम्यशिष्टाणं॥ तत्प्रकारश्चेत्स
प नारायणायेत्यत्र मम इति नमसः सखण्डस्य चतुर्थ्यन्तनारायणपदान्वये। नारायणाय मनेति वाक्यभंगी भवति॥ तत्र चतुर्थ्युक्ते भगवत्कैङ्कर्ये
मः नेति स्वार्थत्वनिषेधात्॥ गम्यशिष्टाणं एवं स्वरूपोपायपुरुषार्थाः शिष्टाः॥ त्रितयशिष्टाणात्तस्य माह॥ स्वातन्त्र्यमित्यादि॥ प्रणवानि
रेनन नमसा प्रणवान्तर्वाषित्वप्रसननीकं॥ स्वातन्त्र्यं तस्य सोऽक्षरः परमः स्वराट् पतिं विश्वस्यात्मेश्वरमित्यादि वेदान्तेषु स्वतन्त्रत्वेन सिद्धस्य हरे
स्वार्थतया सर्वविहेतौ विस्मृते वा चित्तमिस्य थसिद्ध रूपस्य स्पर्हैरत्नस्योचितमिति लिंगाविपरिणमेन्नान्वयः॥ रूपखण्डनमोन्वितेन नमसा निजरक्ष
णं स्वकीयं संरक्षणं चेतनाभीष्टोपायतास्य॥ एवंभूत पालनं सेतुविधरणं॥ निवास शरणसुहृत्॥ गतिनारायणाद्यसादिषु सर्वरक्षके केवल
हरनेप्रसिद्धस्य हरेरस्वाभिसितानां विरोधिनो निवर्तयतः॥ अभीष्टप्रापयतश्च विश्वासे वोचिनान्योचित (भीष्टप्राय) नारायणपदान्वितेन नमसा स
स्यसूचितं॥ शेषत्वरूपाच्चरूपाणश्चतुर्थ्या परश्च स्वत पर्यन्तं कैङ्कर्यं तस्य स्वरूपस्वर्वेश्वर॥ एवं नार्ताधिपतिः स्वरं प्रधानममता तादहर॥ सरात्मना
वीचा वेदवाणं तु: तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं तस्मादिषु सर्वशेषित्वेन वेदान्तप्रसिद्धस्य हरे॥ सर्वशेषत्वपाहृतोवि
रोधेवोचितानान्योचिता। इति प्रत्येकेन प्रकारेण विविच्य विभज्य कथितं प्रमिहितं। प्रधानार्थमुपसंहरति॥ स्वस्यापीति तनः हरेर्वोचित ६

शिव इति सर्वपुंसां समूहा॥ नारो नराणां संघातः॥ नरात् जाता नि तत्वानि॥ ॥ ऽपो नारा इति प्रोक्ता इत्यादिकमत्रानुसंधेयं इममर्थमभिप्रेत्य
नारायणशब्दो व्याख्यायते॥ नारायण इति व्याख्येयपदोपादानं॥ नित्या नामी इति तस्य व्याख्यानं॥ निवहा॥ ॥ यनेन तारेत्यत्र नरश
ब्दोपरि तस्य समूहा इति सूत्र विहित तस्यासाप्रत्यर्थत्वं उक्तं॥ ॥ पत्रपस्येति शेषपूरणेन नराणां निवहा॥ ॥ अयनं पस्ये ति बहुव्रीहि निव
हेयापरितस्य समूहा इति सूत्रविहित तस्यासाध्यर्थत्व। तुरुषं ख्याभि सहिता: अयनशब्दस्य नपुंसकतया तत्पुरुषपक्षे
हेवा ऽस्य षष्ठ्यंत तया विभक्ति परिणामेन नराणां नित्या नामयनमिति त तुरुषं ख्याभिसहिता: अयनशब्दस्य नपुंसकतया तत्पुरुषपक्षे
परवल्लिंगत्वं लोकादिनिबोध्यं समुहार्थतद्धितोतेन नारशब्देन चेतनानां परस्परं भेदः चेतनानां ईश्वरस्य परस्परं भेदः चेतनाचेतनानां पर
स्परं भेदः समासेनेश्वराच्चेतनस्य भेदः अचेतनस्येश्वरादिद इति पंचापि भेदा लभ्यंते इत्यनेन प्रकारेण तत्पुरुष बहुव्रीहिरूपसमासद्वय
त्वं ध्यावयवार्थपुरुषकारेण नारायणपदं यं प्राप्यत्वेन प्रापकत्वेन समं चिदचिदंतर्यामित्वेन सत्सुलब्धत्वेन च वेदांतप्रसिद्धं भगवंतं आह
ब्रवीतित्त याहि ऋग्मिति यः ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति
यथा नद्यः स्यंदमानाः समुद्रेस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं परं ज्योतिरुपसंपद्य स्वेन
रूपेणाभिनिष्पद्यते ॥ न वद्दविरोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमा
भिसंभवामि तत्काद्देहं पुनर्जन्म नैति मामेति सोर्जुन मामेवैष्यसि मद्भक्तेन प्रतिजाने प्रियोसि मे मामुपेत्य पुनर्जन्म दुःखालयमशाश्व
तमिति तमेवं विद्वानमृत इह भवति नान्यः पंथा ॥ यनाय विद्यते ॥ एष सेतुः नायं ऽऽत्मा प्रवचनेन लभ्यो न मेधया न बहुना
श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं संसा
रार्णवमग्नानां विषयाक्रांतचेतसां विष्णुपोतं विना नान्यत्किंचिदस्ति परायणं तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ पहस्मरा
म
मिमइकन्यामिप्रमागतो इति ह द्यौश्च पृथिवी चांतरिक्षं समेते मनः सह प्राणैश्च सर्वैः एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ
विधृतौ तिष्ठतः ब्रह्माद्युत्तिष्ठ भुवनानि धारयन् सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः परं च त्वं च सर्वेषामधारः पर।
मेश्वरः मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् भूतभृन्न च भूतस्थो ममात्मा भूत
भावन इति ऽपंत प्रविष्टः शास्ता जनानां सर्वात्मा [illegible] विष्टं लारमेत यः पृथिव्यां तिष्ठन् पृथिव्या

त्वाद्धेतोः स्वातंत्र्यादित्रयं स्वस्यापि स्वस्य हरेश्च नार्हस्य चितं स्वहरि साधारणं न भवतीर्थः २ पत्र प्रणावारवंर नमः पद नारायण पदि स्य स्वरवं उनमोन्वयेन
६ स्वरूपोपायपुरुषार्था: निरूप्यन्ते इति दर्शिता २ पर्यालवनत्याहि शेषत्वाकारत्रय मुक्तं भवति २२ पयस्वरूपं स्वरूपानुपोपेय प्रार्थनाचमंत्रप्र
मेयमितिमयोक्तना नामनुस्मरन्प्रणवा [illegible] न्वितनम शब्दश्लोकीता येनुबाद पूर्वकं नारायण पदं व्याचष्टे २ पकारार्थीयैवरत्व महमपि मत्येनेनि
वहानरायणं नित्यानामयनमिति नारायणपदं [illegible] पत्राहा स्मै कालं सकलं मपि सर्वत्र सव नावस्थासु सर्वा विस्तुर्मम सहजकैंकर्यं विधयाउ २ पहं
२ पकारार्थीयम गवच्छेषएव स्वशेषभूतश्चेतिप्रणवा [illegible] नुवाद २ पत्राहमिति मकारार्थनुवाद २ पकारार्थीयेसकारवाच्यानुवाद एवकारेणोका
रार्थानुवाद स्वमिति लुप्तता दर्थ्यचतुर्थ्यनुवाद २ पयपत्तत्सयः निपातानामनेनकार्थत्वात् ॥ महमद र्थोपि लुप्तः तत्स्वतंत्रः निपावलंम न
वामि २ पयंनमः शब्दार्थानुवाद ॥ तत्रमह्यमितिषष्ठ्यंतमकारार्थानुवाद ॥ मह्यमित्यत्र चतुर्थीमकारो तरषष्ठ्या स्थाद र्थ्यमुक्तायनार्थ २ पयनारा
यणशब्दार्थमाह ॥ नराणाम ति नाराणामयनमीति षष्ठीतत्पुरुषेण नारा २ पयनं पस्येति बहुव्रीहिणाच नारायणशब्दो निष्पन्नः उस्येदति
उ धातोरन्येभ्योपि दृश्यंत इति कर्तरि पूत्ययेन स्यानुबंधत्वाच निष्पन्नो नरशब्दः ॥ नित्यमिस्तुवस्तु वाचित स्यनजर्थेन नशब्देन सुसुपोति समासेन पे
रशब्दव्यस्ति तेनन शब्दो नित्यवस्तुवाची नाराणं समूहा नाराः तस्य समूह इत्यण ॥ अयनगताविति धातो रियत इत्यनेनेति नेनेत्यथनं य
श्री रिमन्नि त्यमनमिति करणाधिकरणयो श्चेति ल्युटो बहुलं करणाधिकरणयोश्चेति सूत्र विहितेन ल्युट्प्रत्ययेन निष्पन्नारूपायोऽयन
श्री शब्द ॥ प्राप्य प्रापक त्वाधारत्व व्यापकत्वं ॥ तेषु तत्रोप्यत्वेन षष्ठी समासे भोगवक्तत्वेनाप्राप्य प्रापकत्वानि त्वंमेते ॥ २ पा
धारो धेयत्वेन परत्वेन परत्वमुक्तं भवति बहुव्रीहिसमासे तस्य सर्वाधारकत्वप्रति पादनात् सोलभ्य मंत्र व्यापित्वं चोक्तं भवति ॥
पूर्वं पदात्संज्ञायामगः इति २ पयन शब्दन कारस्य णत्वं ॥ नित्यवस्तुनि च ज्ञानंदामलत्वादयो दिव्यात्मस्वरूपगुणाः दिव्य विग्रहा ॥ ना
कांतिसौकुमार्यादि योविग्रहगुणा दिव्य भूषायुधम महिष्य ॥ दिव्यपरिजना ॥ श्री वैकुंठलोकप्रकृतिपुरुष कालमहं [illegible]
दा विकारा ॥ २ पंडान्यंडान्तर्गत पदार्था धर्मस्व २ पत्रज्ञानादयः कालांतरस्वरूपो नित्यामहदादयः प्रवाहतो नित्याइति विविकः ॥ स्वरूप नित्य
त्वेनाम सत्स्व सत्सुत्वम्निविनाशात्यंतामावप्रवाहतो नित्यत्वं नामनुत्पत्तिविनाशयो ॥ तेस च्यवपूर्वं नामरूपान्ययाभावः २ पत्रनार ६

भा

रि॰ सं तिष्ठन् पृथिव्या अन्तरो यं अन्तरो पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीम् अन्तरो यमयति स त आत्मा अन्तर्याम्यमृत एवं च
आत्मनि तिष्ठन्नित्यादि यः ॥ पृथिवीमन्तरमन्तरे संचरन्नित्यादि यः पृथिवीमन्तरे संचरन्नित्यारभ्य एष सर्वभूतान्तरात्मापहतपाप्मा
९ दिव्यो देव एको नारायण इत्यन्ताः सुबालोपनिषत् ॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः सर्वत्रासौ समस्तं च य
स्मिं चित्तस्वरूपत्वेन ॥ सर्वस्य चाहं हृदि संनिविष्टो इत्युक्तः सर्वभूतान्यापि ति पिविष्णुर्भुवनानि विष्णुरिति ॥ संवाहुभ्यां धमति सं प
तत्रैर्द्यावापृथिवी जनयन्देव एकः नमीश्वराणां परमं महेश्वरं यस्मात्परं नापरमस्ति किंचित् ॥ स कारणं करणाधिपाधिपन
तत्समश्चाभ्यधिकश्च दृश्यते ॥ एषमेव हि तत्ते जो जस्य जनकोऽमृता ॥ परात्पराणां परमं ॥ परमात्मात्मसंस्थितः परापरा ॥
पूर्णः सकलानयत्र त्वं शौरिः स्वयमानमुखा मुक्ता ॥ एहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसामिति ॥ पत्रे दमनुसं
धेयं परत्वं सौलभ्यं यो सौलभ्यमेव गावतो प्रधानभूतो गुणः परत्वं तु तस्य गुणस्य पादमात्रं तयात्मप्रधानभूतं परत्वं
सन्निहितं सौलभ्यगुणाय अयमर्थः प्रसादपरमो नाथो मम गेहमुपस्थिता वित्यादि श्रीपराशरस्मृतौ प्रसापरमावनि ८
परं प्रसादः परमोयमोस्तावित्तिगन्हे एनाथशरादौ परत्वापूर्वस्थापाद्धिकं सौलभ्यापरपर्यायस्य प्रसादस्य वदतासूच्य
ता म चं तद्यतिप्रकृतमनुराम पमित्यनेन वरायणपदरूपस्यार्थो विस्तरः चित् इति परेमे भगवते नारायणपदोपरिस्थि
तचतुर्थ्यार्थं तादर्थ्यं तच्छेषत्वं तच्चैकैककर्म्यप्रार्थना चतुर्थ्यर्थे कैकर्म्य चासंकोचात्सर्वदेशा सर्वकाल सर्वावस्थोचितं सर्वप्रकारं विवक्षितं ॥
मित्यभिसंधायाह कालमित्यादिना श्लोकशेषेण सकलमित्यन्तसंयोगे द्वितीया सर्वे विपिकालेष्विसर्थः सर्वत्र सर्वद्वपि देशेषु सर्वास्व
वस्थास्थितिगमनशयनादिषु सर्वाप्वपि देशास्मम भगवदनन्यार्हशेषत्व लक्षणस्वरूपज्ञानवत्त इत्सर्थः सहजाशेषत्वरूपानुबन्धिनः
कैकर्म्यविधयः कैकर्म्यप्रन्नुस्थानानि कैकर्म्यस्य सकलविधत्वविवक्षयाविधय इति बहुवचनेनाविस्तुः स्वाभाविकत्वेन अविद्यादितिरो
रोधाननिवृत्त्याविर्भवंतु अत्र येन येधातत्गच्छति छायावासि त्वमनुगच्छेत् भवांस्तु सह वैदेह्या गच्छ संवनवासाय सर्वेषु सर्वेषु देशका
लेषु अहंकारार्थकामेषु अनादृतसुतंगेहीसाराधनानां सर्वेषां विसोरा राधनं परं इत्यादिकमनुसंधेयं भोजनपूर्वभाविन्यास्तु धाद्व

कैंकर्य्यपूर्वभाविन्याः प्रथमभक्तेरपि आविर्भावार्थसिद्धः भगवच्छेषत्वपर्यंतत्वात् भागवतकैंकर्याविर्भावोऽर्थसिद्धः तेच कैंकर्यविधयः
नित्याः भाष्यकृता विस्तरेण दर्शितास्तत्रैव द्रष्टव्याः। तथा त्वादहं विष्णोरेव शेषभूतो नमम सर्वशेषिणो नारायणायैव सर्वदेशसर्वकालसर्वा
वस्थोचिताशेषशेषतैकरत्तिस्तव भवेयं पुंडरीकाक्ष त्वमेवैवं कुरुष्वमां इत्यादिकमत्रानुसंधेयं ३ एवं श्लोकत्रयेण दर्शिताः मंत्रार्थ
तेच प्रयत्नेन सर्वदानुसंधेयाः अन्यथा प्रमादः स्यादिति आशयेनाह देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात्तृतीयं स्वातंत्र्यां
धोपदिष्ट्या त्वप्रथममितरशेषत्वधीश्चेद्द्वितीयं आत्मत्राणोन्मुखश्चेन्नम इति च पदं बांधवाभासलोलः शब्दं नारायणाख्यं विषयचप
लधीश्चेच्चतुर्थीं प्रपन्नः ४ इति प्रपन्नाः विदिताका रत्रयलक्षणस्वरूपः देहेसक्तात्मबुद्धिः॥ देहे सक्ता लग्ना
देहविषयाध्यात्मेतिबुद्धिर्यस्य तथोक्तो भवति यदि स्याच्चेत् प्राचीनकर्मवासनानुवृत्तिवशादिति भावः तृतीयं पदं प्रणवस्थेषु पदेषु
तृतीयं पदं मकारं तदर्थमित्यर्थः साधु सम्यग्विद धीत अनुसंदधीतेत्यर्थः अनुसंधत्ते सम्यक् नाम सदा तनत्वमिति बोध्यम मकार
स्य जडाचेतनस्थूलदुःखरूपदेहविलक्षणज्ञानानंदगुणकज्ञानानंदस्वरूपाणुपरिमाणस्य वस्तुनो वाचकत्वात् तदर्थानुसंधाने सा
बुद्धिर्निवर्त्तते तन्मूलपापानि च न प्रसज्यंते इति भावः स्वातंत्र्यांधः स्वतंत्रे स्वस्य स्वाधिनता बुध्या अंधस्तिरोहितभगवच्छेषत्वस्वरूप
स्याद्यदि तदा प्रथमं प्रणवे आद्यपदं लुप्ततादर्थ्यचतुर्थीकं मकारं साधु विद्यात् तथा च लुप्तचतुर्थीकाकारो सन् भगवच्छेषत्वज्ञानात्स्वा
तंत्र्यभ्रमो निवर्त्तते तेन स्वातिशयाधायकस्वर्गादिसाधनेषु च न प्रवर्त्तेत इति भावः ननु भगवच्छेषत्वज्ञानमात्रेण कथं स्वातंत्र्यभ्रमनि
वृत्तिः भगवच्छेषत्वज्ञानानंतरमपि अहं मम भगवतः अन्येषां च शेष इति भ्रमस्य संभवात् स्वशेषत्वभ्रमो हि स्वातंत्र्यभ्रमः अन्यथा स्व
स्य स्वशेषत्वनिवर्त्तकं नमः प्रणवान्वयकथनवैयर्थ्यादिति चेदुच्यते स्वातंत्र्यभ्रमो हि द्विविधः॥ अहं ममैव शेष इत्येकः अहं मम भगव
तः अन्येषां च शेष इत्यपरः तत्राद्यस्याकारो सन् भगवच्छेषत्वज्ञानान्निवर्त्तित इति विवक्षितेति न दोषः द्वितीयस्वातंत्र्यभ्रमनिरासाय नमसः
प्रणवान्वयोऽपि सार्थक इति इतरशेषत्वधीश्चेत् भगवदन्यशेषत्वभ्रांतिमान् यदि द्वितीयं प्रणवे द्वितीयं पदं उकारं साधु वि…त् तथा चोका
रस्यावधारणार्थस्याकारार्थान्वयेन लुप्तचतुर्थ्यर्थशेषत्वस्य भगवत अन्ययोगव्यवच्छेदकत्वात् तदर्थानुसंधानेन अन्यशेषत्वभ्रमो देवतां
तराभजनादिकं च निवर्त्तत इति भावः आत्मत्राणोन्मुखः आत्मनः स्वस्य त्राणे रक्षणे उन्मुखः उद्युक्तः साधनांतरस्वीकारदृष्टिश्चेत्तदा नम इति।

पदं सखंडनमोन्वितमखंडनमःपदं अनन्यशरणत्वप्रतिपादकं साधुविद्यात् तथा च नमः।
यदर्थानुसंधानेन नैं भगवानेव मम रक्षको नाहमिति बुध्या साधनांतरेभ्यो निवर्त्तते इति भावः
साधनांतरप्रयत्नौ तु प्रायश्चित्तिभिरियं सात्र यत्तु नः शरणं व्रजेदिति ॥ विहितपूर्वप्रपदनस्मरणरू
पिप्रायश्चित्तमनुष्ठेयमिति तात्पर्यं ॥ चकारसाखंडाखंडनमसोरितरेतरयोगं प्रतिपादयति ॥ बं
धवएव बांधवाः। बांधवा इव आभासंते इति बांधवाभासाः आपद्यरक्षकाः संपदि सर्वस्वापहारि
णः। शरीरसंबंधिनस्तेषु लोलत्वप्रासक्तेर्भवेत् ॥ लोलइत्यनेन अप्रसेवते षु भावणं॥ ननु तेषामसिद्धि
तिस्सूचितं तदा नारायणत्वं नारायणे त्वात्वा प्रसिद्धिर्यस्तं तथोक्तं श्यादं साधुविद्यात् ॥ चतुर्थी:प्र
धगनुसंधेयत्वस्य वक्ष्यमाणत्वात् ॥ अत्र प्रातिपदिकमात्रस्य विभज्य कथनार्थमाव्योशब्दः अत एव त्रा न
कर्म बद्धस्तुक्तं न तु पदमिति ॥ विवक्षितं हि पदं ॥ तथा च नारायणशब्दो माता पिता भ्राता निवासः शरणं सु म
हृदित्युक्तरीत्या निरुपाधिकसकलविधबंधुत्वं भगवतः प्रतिपादयति इति तदर्थानुसंधानेन देहा
नुबंध्यौपाधिकबंधौपाधिकबंधुषु लोलत्वं निवर्त्तते॥ ननु कथं नारायणपदेन भगवतः सकलविध
बंधुत्वप्रतिपादनमिति चेदुच्यते ॥ तत्पुरुषसमासे कर्मणि ल्युडंतेनासनयशब्देन भगवतः प्राप्यत्वप्र
तिपाद्यते॥ नाप्यत्वं चासंकोचेन सर्वप्रकारं विवक्षितं ॥ बंधुत्वाभोपिप्राप्यांतर्गतः॥ ततश्च परिपूर्ण

मं॰ तयासंपद्यपि किंचित्कारणानिरपेक्षत्वात्॥ मत्त्वा यदि संप्राप्ते स्मर्त्तव्यो भगवान्हरिरित्युक्तरीत्या स्वाश्रि
तानां सकलापत्तिवर्ज्जकत्वसर्वस्व रुद्रादिगजेंद्रादीनां वेदापहारादिष्वापत्सु दृष्टत्वाच्च निरुपाधिसकल
विपद्वंधुत्वसिद्धिरिति विषयेषु शब्दस्पर्शादिषु विहित निषिद्ध रूपेषु चैहिकेषु चामुष्मिकेषु च चपलासाभि
लाषा धीर्यस्य स तथोक्त स्यादिति॥ चतुर्थी नारायणपदोपरिस्थितां सर्वेड नमः पदान्वितां व्यक्तचतुर्थी गुणा तु
नुभवजनितप्रीतिकारितसर्वदेशसर्वकालसर्वावस्थोचितनित्यमिरवद्यनिरतिशय भोग्य भगवत्कैंकर्यप्रार्थना
प्रकाशिकां साधु विद्यात्। तेन तदितर सुखलवजनकपरिणति विरसदुःखबहुलं चंचलं हेयं सकलविषयविमु
क्तो वा भवतीति भावः॥ ननु कथं चतुर्थ्यार्थानुसंधानेन विषयांतरप्रावण्यनिवृत्तिः नमः शब्दान्वयेपि कैंकर्यार्थि
त्वार्थत्वबुद्धि मात्रस्य हि निवृत्तिरिति चेदुच्यते॥ नमः पदनिवर्त्यं कैंकर्यस्य स्वार्थत्वं नाम स्वातिशयाधायकत्वं।
तथा च शेष्यतिशयाधायकस्यापि स्वार्थस्य तद्देकत्वे स्वरूपरूपविरुद्धत्तया नमः पदे न निवृत्ति वृत्तिश्चेत्
केवल स्वार्थतया तत्स्वरूपविरुद्धस्य विषयांतरस्य निवृत्तिर्दंडापूपिकान्यायेन सिद्धा। तथा च भगवदेकाति
शयाधायकेतर भोगत्वाहित्यलक्षणमन्येन भोगत्वं नमः पदान्वित चतुर्थ्यर्थपर्यालोचनमिति द्रष्टव्यं। एतत्सर्वं
गुरुत्वधिकारि विशेषणानियतमित्यभिसंधाय प्रपन्न इत्युक्तं॥ भक्तिनिष्ठस्याप्यंगप्रपत्तिसद्भावेपि प्रधानेनैव हि व्यप
देशा इति न्यायेन न तस्य प्रपन्नशब्दव्यपदेश्यत्वं॥ किंतु प्रपत्तिनिष्ठस्यैवेति प्रपन्नस्यैव विहित विषयत्यागः॥ भक्ति

ति निष्पन्नस्य तु स्वविहितप्रतिषिद्धविषयत्यागमात्रं विहितं विहितविषयस्तु तस्यापि धर्मबुद्ध्या उपादेय एव तस्य स्वरूपानु
रूपतया निषिद्धत्यागोऽपि जायते ॥ ब्राह्मणस्य सोमविद्यां प्रजामृणवाक्यसंगादिति प्रपन्नस्य यथान्यत्र शेषत्वरूपतात
पाप्रागेवोक्तं ॥ किं तु प्रपन्नस्य विहितविषयोपादानं मनन्यशरणत्वस्वरूपविरुद्धं ॥ भोग्यताबुद्ध्या तदुपादानं चा
नन्यभोग्यत्वस्वरूपविरुद्धमिति सर्वथास्याधिकारिणो विहितविहितविषयत्याग एव वर्णाश्रमोचितकर्मणो
२१ मिति ॥ अन्यशंसात दुपादानमिति चेत् ॥ अनेनाधिकारिणा त्वुक्तेऽपि विहितविषये लोकानां रागादेव प्रवृत्तिसंभवा
त् ॥ विहितस्य कथं त्याग इति चेत् ॥ सत्यं तद्विधेः करणत्रयपापकारणार्थतया अप्रसक्तदेवचपत्वभावात् ॥ प्रपन्नेवि
नसंप्रति प्रपन्नानामपि क्वचिद्विषयान्तरे प्रवृत्तिर्दृश्यमाना अपायस्यं स्पर्शे सद्यः प्रायश्चित्तमाचरेत् ॥ प्रायश्चि
त्तिरियं सात्र यत्पुनः शरणं व्रजेत् तु करीत्यावा ॥ आत्मसंसमत्वप्रतिपदोक्तं प्रायश्चित्तेन वा पनोद्या ॥ अकृतप्राय
श्चित्तानुकौटिल्ये सति हरी त्वपाप्यनयत् ॥ लघुदंडं प्रपन्नस्य राजपुत्रापराधवत् । इत्युरीत्या लघुदंडोपनोद्यैवेति
न तु स्वरूपयात्मयत्नानावतः प्रपन्नस्य कथं देहात्मभ्रमादिसंभव यन्निवृत्तये मंत्रावयवार्थानुसंधानं विधीय
ते ॥ अपि च प्राप्यात्मयत्नानाहितभ्रमानुवृत्तिवद् नादिवीपरीतवासनारूपदोषानुवृत्त्या देहात्मभ्रमाद्यनु
वृत्तिसंभवात् तथा चानवरतं मन्त्रार्थानुसंधाने च सा निवर्तनीया ॥ अत्रेदमप्यनुसंधेयं ॥ इत्थमनव । रत मंत्रा
र्थानुसंधानेन न केवलमनुसंधातुरेव विरोधिनिवृत्तिः ॥ अपि तु तदावासदेशवासिनामपि तन्निवृत्तिर्भवति ॥ त
था हि स्मरंति ॥ यत्राष्टाक्षरसंसिद्धो ॥ अष्टाक्षरजनितसम्यक्ज्ञानवान्नित्यर्थः ॥ व्याधिःजन्मजरामरणाद्या
ः महाभागो महीयते न तत्र संचरिष्यंति व्याधिदुर्भिक्षतस्कराः इति अष्टाक्षरसंसिद्धिः ॥
ति

मं० पादकविषयांतरश्रवणमिति॥नन्विह त्वस्मिन्पुरुषे कामानानान्याव्याधिभिः परिपूर्णो लक्ष्मीस्तु करीत्या
१० परोन्हो। कौव्याधिश्चातुर्थिकज्वरः दुर्भिक्षक्षामः स्वरूपज्ञाता ज्ञा भक्तस्वर्च्चः। तस्करश्चोरः आत्मापहारयोन्य
यासंतमात्मानमन्यथा प्रतिपाद्यते किं तेन न कृतं पापं चौरेणात्मापहारिणा इति स्मृतेः॥सर्वमप्यावारांतस्यं
इत्युक्तेरीता सकलचा स्वसंग्रह भूते स्मिन्॥मंत्रेऽप्यर्थपंचकमपि प्रतिपाद्यं प्राप्यस्वब्रह्मणोरूपं प्राप्तुश्च
प्रत्यगात्मनः॥प्राप्त्युपायं फलं प्राप्तिस्तथा प्राप्तिविरोधि च॥ वदंति सकला वेदाः सेतिहा सपुराणकाः॥मुनयश्च
महात्मानो वेदवेदांतपारगाः इति विस्तारसकलवेदतदुपबृंहणरूपसारार्थपंचकप्रतिपादनपरत्वं स्मृते॥
तथाहि प्रणवेन प्रत्यगात्मस्वरूपं प्रतिपाद्यते नारायणपदेन प्राप्यस्वरूपं॥सर्वेऽनमोन्विते न प्रवे ऽन
मसाउपायस्वरूपं॥सर्वेऽनमसि निषेधप्रतियोगि समर्पकेन षष्ठ्यंत मकारेण विरोधिस्वरूपं॥ध्यवहार
स्तु भवेन्मत्युरित्यादि स्मृतेः॥व्यक्तचतुर्थ्यां कैंकर्यरूपं फलस्वरूपं चेति विवेकः॥अस्मिन्मंत्रराजे जीवपर
मात्मनोर्नवविधसंबंधः प्रतिपाद्यः॥पिता च रक्षकः शेषी भर्ता ज्ञेयो रमापतिः॥स्वाम्याधारो ममात्मा च भोक्ता
चायमनूदितः॥इत्यभियुक्तवचनात्॥तत्र श्रुतिस्मृतयः॥माता पिता भ्राता निवासः अहं बीजप्रदः पिता॥
अहं तावन्महाराजे पितृत्वं नोपलक्षये इति॥येन जातानि जीवंति॥परित्राणाय साधूनां॥नसद्दासमाहरे
विपन्नं विनिवर्त्तते॥समर्थो हि रूपतेः कश्चित् तं विना पुरुषोत्तमं॥नहि पालनसामर्थ्यमृते सर्वेश्वरं हरि
मिति॥पतिं विश्वस्यात्मेश्वरमिति सकारणं करणाधिपाधिपः॥पतिं पतीनां परमं परस्तात्॥भ्राता भर्ता च १०

त

वंधुस्य स्त्रीप्रापमितरत्सर्वं इति ॥ श्रोतव्यो मंतव्यो निदिध्यासितव्यः ॥ नारायणमहाज्ञेयमिति तमीश्वराणां परमं
महेश्वरं ॥ ईशा सर्वस्य जगतः ईश्वरः सर्वभूतानां ॥ सत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थितं ॥ यस्मिन्द्यौः पृ
थिवी चांतरिक्षमोतं ॥ परमात्मा च सर्वेषामाधारः परमेश्वर इति ॥ एष सर्वभूतांतरात्मा अंतः प्रविष्टः शास्ता जना
नां सर्वात्मा अहमात्मा गुडाकेशेति ॥ अहमन्नमहमन्नमहमन्नं ॥ अहमन्नमन्नमदंतमद्मि इति च ॥ अन्नस्य स्थि
स्थित्साध्यूनेकार्यकावंदेतरयतेर्वा धातोरुत्पन्नेनाकारेणासृष्टिकर्तृत्वात् स्थितृत्वं स्थितिकर्तृत्वं चोच्यते लुप्तचतु
र्थ्यातिशेषत्वे प्रतिपाद्यमानेतत्समानविभक्तिवेद्य तया तत्प्रतिसंबंधिविशेषितत्वमप्यकारार्थस्य सिध्यति ॥ अनन्या
र्हत्वप्रतिपादकेन ढकारेण भर्तृत्वमर्थानुक्तं ॥ मकारोक्तेन ज्ञातृत्वेन ज्ञेयत्वमर्थासिद्धं ॥ नारायणपदे त
पदे त्पुरुषसमासे अधिकरणोत्पन्नेन अयनशब्देन आधारत्वं प्रतिपाद्यते तेन स्वामित्वमप्यर्थं बहुव्रीहिसमासे
सर्वाधारकत्वप्रतिपादनेनांतर्यामित्वलाभादात्मत्वमुक्तं भवति नमः पदान्वितव्यक्तचतुर्थ्यैकेकर्यरूप
भगवद्भोगप्रतिपादनात् ॥ चंदनचंद्रिकामलयमारुतादि भोगजनकत्वाच्चेतनस्य भोग्यत्वं ॥ भगवतो भो
क्तृत्वं च सिद्धं ॥ एतेन नवविधसंबंधाः संप्रदायमनुसृत्योक्ताः ॥ एवं संबंधांतराण्यपि जीवपरयोः शास्त्रेषु दृश्यंते ।
एक इंद्रो राजा जगतो वभूवेत्याद्युक्तो राजभृत्यभावः । स चाचार्यवंशो ज्ञेयः ॥ आचार्याणामसावसाविस्याभ
गवत्तः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तमस्य पूज्यपश्च गुरुर्गरीयान् यथा हंसोन
दोगुरुः ॥ नरनारायणौ भत्वा स्वयं व दरिकाश्रमे इत्याद्युक्तो गुरुशिष्यभावः ॥ अंशेनानावयपदेशादित्या

दिसूत्रोक्तन्यायानुग्रहीतोभीर्ममैवांशोजीवलोके इत्यादिस्मृत्युपबृंहिताभिः भेदाभेदश्रुतिसिद्धांशां
शिभावः॥शेषमन्यदपिद्रष्टव्यं॥एतत्सर्वं कर्माचार्य्युक्तन्यायनयाद्बद्धसिद्धमितिवोध्यमू॥७॥ एवं मूलमंत्रं
व्याख्याय तत्र द्विनमोनारायणपदाभ्यां संग्रहेणोक्तं सोपायोपेयस्वरूपस्य विवरणपरमाचार्यगुरूपिप
रिगृहीतं मंत्ररत्नंश्लोकद्वयेनव्याचक्षाणास्तत्पसमासतः॥षट्पदत्वेपि अवांतरपदानांदशानामर्था
न्दर्शयति॥नेतृत्वमितिश्लोकेनपूर्वखंडस्य श्रीशब्दार्थमाह।नेतृत्वमिति॥नेतृत्वंनित्ययोगंसमुचित चि
गुणजातंतनुख्यापनंचोपायंकर्त्तव्यभागंत्वथमिथुनपरं प्राप्यमेवंप्रसिद्धं॥ स्वामित्वंप्रार्थनांचप्रबलतर ल
विरोधिप्रहाणं दशैतान्मंतारं त्रायतेचेत्यधिगतनिगमः षट्पदोयंद्विखंडः॥५॥ नयतिप्रापयतीतिने
त्रीघटकं भूतातत्साभावः।नेतृत्वं।त्वतलोर्गुणवचनस्येतिपुंवद्भावः॥श्रीर्हि मातृत्वप्रयुक्तकृपाशालिनीस्व
वश्यंचेतनेषु पितृत्वप्रयुक्तहितपरतयाऽपरंत्वमपिलातेनचेतनान्घटयतिततोऽस्यापुरुषकारत्वं
।श्रीपतेरितिकर्मणिल्युट्प्रत्ययमाणेषु चेतनेषुवात्सल्यस्यश्रयत इतिकर्त्तरिल्युटस्याश्रयणीयेभगव
तिवाल्लभ्यस्यचसूचनात्।श्रीयमाणेवात्सल्यंश्रयमाणेचवाल्लभ्यंचेवहि पुरुषाकारत्वं॥नेमअतएवता
दृशानांभागवतानामपिपुरुषाकारत्वंनिर्व्यूढं॥अन्नाकिंचन्यैकशरणाः केचिदनन्याधिकाः पुनः॥मत्प्राप्तिं
प्रतिजंतूनांसंसारेपततामधः।अहंमत्प्राप्त्युपायोवैसाक्षाल्लक्ष्मीपतिःस्वयंइतिविष्वक्सेनाद्विवचनजातम
नुसंधेयं॥मनुष्वर्धमाह॥नित्ययोगमिति॥नित्यसंबंधमित्यर्थः॥तदुक्तंकात्यायने॥भूमिर्भिदाप्रशंसासुनि

स्यैयोगेतिप्रापिते॥ संसर्गेऽस्तिविवक्षायां भवति मतुपादय इति॥ अत्रायं मतुप्प्रत्ययो नित्ययोगे विहितो ता
स्तीसमात्रे घटकजनस्याहितघटनीया॥ नामाश्रयस्य रुचिजननावसरं प्रती त्यपप्रघटनायामाश्रयणीये
न नित्ययोगोपहितः। विष्णोः श्रीरनपायिनी॥ अपनमाएचवेणा हो॥ अहं। सा ब्रह्मणस्तस्य सा हमस्मी
सनातनीत्यादि प्रमाणं॥ स्वारस्याच्चेति भावः॥ अप्यपुरुषाकारणस्वतंत्र्यनिमग्नेऽउद्भवतः॥ पूर्वखंडस्य नारा
चि यणपदविवक्षितानगुणानाह॥ समुचितेति। समुचिताः सम्यगुचिताश्चानिमग्नेनउप्रवर्तं॥ आश्रयणसौकर्यापाद
कत्वेन॥ आश्रितकार्यापादकत्वेन चात्यंतोचिताः गुणाः। वात्सल्यस्वामित्वसौशील्यसौलभ्यज्ञानशक्तिपूर्तिप्रा
प्तयः तेषां जातं समूहं॥ आश्रयणसौकर्याश्रितकार्यापादनमुखेन गुणानां समूहीकरणं॥ जातशब्देन विवक्षि
तं॥ नारायणपदस्य समस्तकल्याणगुणवाचकत्वेपि कतिपयगुणानामेवात्रोपयोग इति तावन्मात्रविवक्षे
ति भावः॥ तत्र वात्सल्यं नाम दोषभोग्यत्वं। दोषादर्शित्वमित्येके॥ तत्र प्रमाणं। अंगुष्ठमात्रपुरुषो मध्य आ
त्मनि तिष्ठति॥ ईशानो भूतभव्यस्य न ततो विजुगुप्सते। मित्रभावेन संप्राप्तं न त्यजेयं कथंचन॥ दोषो यद्यपि तस्य
स्यात्सतामेतदगर्हितं॥ अविज्ञाता सहस्रांशुरित्यादि॥ स्वापयाध्यानुसंध्यानप्रयुक्त भगवज्जनितभयनिव
त्युपयोगि वात्सल्यं स्वामित्वं नाम। स्वव्यतिरिक्तसमस्तवस्तुस्वकीयत्वाभिमानः॥ स्वत्वमात्मनि संजातं स्वामि
त्वं ब्रह्मणि स्थितं इत्यादिकमत्रमानं॥ मत्कार्यमयमवश्यं करिष्यतीति प्रसयायस्वामित्वं॥ शीलं स्वभावः
शीलं स्वभावे सद्वृत्तावित्यनुशासनात्॥ शोभनशीलं यस्य तस्य भावः सौशील्यं। रूढप्राप्तं महतो मंदैः सहनी

मं. रंध्रसंश्लेषस्वभावत्वमित्यर्थः॥ अहोभाग्यमहोभाग्यं नंदगोपव्रजौकसां इत्यादिकं मानमिहाप्यनुसंधेयं॥
१२ भगवन्मतस्य निक्षेप्तृत्वानुसंधानजनिताभिगम्यत्वभयनिवृत्तिरस्य प्रयोजनं॥ सुलभस्वभावः सौल
भ्यं नमो सच्चक्षुरभीवीक्ष्यते तमित्युक्तरीत्या मां सचक्षुरविषयस्य तद्विषयतामापाद्यनित्यसन्निहितत्वं॥ अ
हं वो बांधवो जातः आत्मानं मानुषं मन्य इत्यादिकमत्रमानं॥ भगवद्दौर्लभ्यभयनिवृत्तिरस्य प्रयोजनं॥ ज्ञा
नं सर्वदा सर्ववस्तुविषयपरोक्षो भावः॥ यः सर्वज्ञः सः सर्ववित्॥ स्वाभाविकी ज्ञानबलक्रिया चेत्यादिकम
त्रमानं॥ इदमनिष्टनिरसनपूर्वकेष्टप्रापणरूप आश्रितकार्योपयोगि निरसनीयानिष्टप्रापणीयेष्टपरिज्ञानाय
॥ शक्तिर्जगदुत्पादनाभावप्रयुक्तमघटितघटनासामर्थ्यं॥ तदुक्तं॥ जगत्प्रकृतिभावो यः सा शक्तिः परिकीर्तिते
ति॥ परास्य शक्तिर्विविधैव श्रूयते इत्यादिकमत्रमानं॥ नित्यं संसारिणो नित्यसूरिपरिषत्संघटने असामर्थ्यशं
कानिरासः॥ शक्तेः प्रयोजनं॥ पूर्त्तिर्नारायणत्वप्रयुक्तसमस्तगुणविभूतिमत्त्वं॥ अवाप्तसमस्तकामत्वमितियाव
त्॥ यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ इत्यादिकमत्रमा
नं॥ स्वकार्ये कर्त्तरि भगवति स्वस्याकिंचित्करत्वासामर्थ्यप्रयुक्तस्वकार्यसिद्धिशंकानिराशः पूर्त्तेरुपयोगः॥
प्राप्तिर्निरुपाधिकशेषित्वं तच्च स्वशेषसमस्तवस्तुहितातिशयाश्रयत्वं॥ अतः स्वामित्वशेषित्वयोर्न पौनरुक्त्यं॥
समस्तवस्तुशेषित्वे प्रमाणमधस्तादेवोक्तं॥ अस्याः प्रयोजनं भगवतः स्वाश्रितकार्यं स्वकार्यमिति प्रतीतेस्तस्य
स्वकार्यकारणे प्राप्त्यभाववशंकाव्युदासः॥ अत्र कारुणिकत्वाभावे ज्ञानशक्त्योर्नापराधपरिज्ञानायैव॥ शक्तिर्य १२

नौ
ध्यापराधं दंडपादनाम्राश्रितानुग्रहोपूर्तिः केनाप्युपकारेणाना वर्त्यनीयत्वापग्रामिरं समंजसाय
विनीत पुत्रस्यागाये वस्रादिनि ज्ञान वात्सल्यादिनामाश्रितानुग्रहोपयोगित्वांर्च कारुणिकताप्यनुसं
धेया॥ ननु वात्सल्येनैवैते षांगतार्थतेतिचे तन्नेतिब्रूम॥ कारुणिकत्वाभावेनिनिरंकुशस्वातंत्र्योन्मुखे
नन्निमग्न तयासन्नपिवात्सल्यादिप्रकाशाइतिवाच्यं॥ पुरुषकारबलेनापिप्रागनुद्भूतकारुणिकताविभा
वेरिनिरंकुशस्वातंत्र्येनिमग्ने वात्सल्यादिप्रकाशा इतिवाच्यं॥ पुरुषकार बलेनापि प्रागनुद्भुतकारुणि
कताविभावे सुखेनैवस्वातंत्र्यनिमीलनं। नस्वतः अतएव किंलक्ष्मीसंरु रक्षीकेशो देव्या कारुण्यरूप
या॥ रक्तकः सर्वसिद्धांतवेदांतेषु चगीयत इतिपुरुषकारभूतयालक्ष्म्याः सविग्रहाभगवत्कृपारूप
तोच्यते॥ अतएववध्यार्हमपिकाकुत्स्थकृपयापर्य्यपालयत॥ सामर्थ्यमान कृपामात्रमनो वृत्तिः
प्रसीदमेइति। कृपायाः प्राधान्यमुच्यते॥ ननुपुरुषकारात्पूर्वं कारुण्यानुद्भवे स्वातंत्र्यमेवहेतुरिक्षित
पु दुद्भवेपिपुरुषकारेणस्वातंत्र्यनिमीलनस्यापेक्षितत्वात। स्वातंत्र्यनिमीलनेनैवा॥ विभोग्यपतयाप्रतीतोस
र्वस्यस्वस्पतदर्शनेनवाकश्चिद्गुणविशेषोपेक्षितः। साचस्वाश्रितदुःखासहत्वरूपाकारुणेवेतिपु
रुषकारकृतस्वातंत्र्य निमीलनमपिकारुण्योन्मेषद्वारैव वात्सल्यादिष्वप्रयोजनकमिति॥ वात्सल्या

मं० १३ दिप्रकाशार्थमपिकारुणिकतावश्यापेक्षणीया॥ नदुक्तं॥ वृषगिरिशृङ्गमेधिगुणाः बोधबलैश्वर्यवीर्य
शक्तिमुखाः॥ दोषा भवेयुरेते यदि नाम दये त्वया विनाभूताः इति॥ इयग्निहोत्राग्न्यवेदाश्वराक्षसानां गृहे
गृहे॥ दयासत्यं च शौचं च राक्षसानां न विद्यते॥१॥ इति ग्रयोप्यत्रानुसंधेयः॥ अथ चरणशब्दार्थमा
ह॥ तनुख्यापनं चेति॥ तनुख्यापनं दिव्यमंगलविग्रहप्रकाशनं। चरणशब्दस्तत्तु उपलक्षणार्थ इति
भावः॥ तन्न उपलक्षकत्वे प्रपदनस्यालंबनमेव न सिध्येत्॥ दिव्यात्मस्वरूपस्यापरिच्छिन्नस्यालंब
नतया विग्रहविशिष्टस्यैव तस्य अपरोक्षापरोक्षस्यैव। आलंबनत्वं॥ द्रौपदीगजेंद्रप्रपदनादौ दृष्टं॥ तनु
शब्द एव वक्तव्ये चरणशब्दोपादानं स्तनंधयप्रजाया जननीस्तन्य इव शेषभूतस्य उपायपरिग्रहे स्व
रूपानुरूपः॥ प्रथमावतारप्रपेत्या इत्यभिसंधाय॥ पाणुपसं-ग्रहणाद्दावपि पादोपसंग्रहणमेव कार्य
सिद्धाविमोघतया दृश्यते॥ शरणशब्दार्थमाह॥ उपायमिति॥ उपाये गृहरक्षित्रोः शब्दः शरणमित्ययं वर्तते सांप्रतं
चैष ह्युपायार्थैकवाचक इति स्मृतेः॥ इत्यत्र शरणशब्द उपायवाचक इति भावः॥ नारायणस्यैवोपायत्वे सर्वमुक्तिप्र
संगपरिहाराय अधिकारिकृत्यप्रतिपादकं प्रपद्य इति पदमित्यभिसंधाय तद्व्याचष्टे॥ कर्त्तव्यभागमिति॥ चेतनकृत्यां
शमित्यर्थः॥ कर्तव्यभागश्चात्र गत्यर्थानां ज्ञानार्थत्वात् इति न्यायेन पद गतावितिधातोरुत्पन्नेन प्रपद्ये इत्यादिना उपायत्वा १३

व्यवसायएवोच्यते॥ व्यवसायं कुरु एवंव्यवसाययुक्तमिति दिवक्ष्यते॥ ऽऽ व्यवसायस्वरूपं च भगवद्भिर्नो काक्षक

द्वि त्वानुमतिरूपः॥ सकृदनुष्ठापाऽव्यभिचारः विलंबरंतः सर्वाधिकारो नियम रहन्यों द्विमस्मतिनिरपेक्षः॥ सुशाको

पांचामभेद्दठा व्यवसाययुक्तो ज्ञानविशेषइति॥ तुशब्देन अयं कर्तव्यभागसर्वमुक्तिप्रसंगपरिहारार्थ॥ अधिका

रिविशेषणं॥ व्याजमात्रेन तु पायः॥ नह्युपापाध्यवसापउपापो भवति॥ पागादाशिष्वसाधनता ज्ञानवदितिद्योत्यते॥

ऽऽ पघइत्पुररवंड व्याख्यानारंभे श्रीमछठ्वद्वार्यमाह॥ मिथुनेति मिथुनं लक्ष्मीनारायणाख्यं द्वंद्वं परंप्रधानं यस्पत

योक्तं मिथुनरूपमित्यर्थः॥ मिथुनंमिथुनरूपंपरंप्राप्यांतराद्युत्कर्षं चेति विशेषणसमास्ता केचित॥ ननुपूर्व

खंडश्रीमत्यद्दस्पतूपायपरत्वंइहतपेयपरत्वंमितिकथमिदं वैषम्यमिति चेत त्राह॥ एवंप्रसिद्धमिति॥ एवं

मिथुनरूपत्वेन प्रकारेणप्रसिद्धं॥ भवास्तुसहवैदेह्या गिरिसानुषुरंस्पते॥ ऽऽ पहंसेवां करिष्यामि जाग्रतस्व

पतश्चतेइत्यादिसुविदितं॥ प्राप्यमुपेयं॥ नारायणशब्दस्पसमस्तकल्याणगुणवाचित्वेपिप्रकृतोपयोगि

नं विवक्षितं। गुणविशेषमाह॥ स्वामित्वमिति शेषित्वमित्यर्थः॥ स्वव्यतिरिक्तसमस्तवस्त्वाहि तानिशायाधा

रत्वलक्षणं॥ सर्वशेषित्वमेवहि चतुर्थ्युक्तशेषत्वानुगुणोगुणः॥ सर्वपरवशंदुखंसेवास्ववतिव्यरिव्या

तानश्ववत्याकदाचन॥ ब्रह्माणंशितिकंटं चेत्यादिभिरप्रपन्नसेवायांनिषिद्धत्वात्प्राप्तसेवायाश्च। छायावा

मं० ५८ सेतुनगछेत॥ वासुदेवतरुछायानातिशीतानधर्मदा॥ नरकांगारशमनीसाकिमर्थंनसेव्यते॥ इत्यादिश्रुवि
हितत्वाच्चतुर्थ्युक्तकैंकर्यस्यस्वादुतमत्वान्नक्षामितरवैलक्षण्यंप्रक्रांतशेषत्वप्रतिपादनमुखेनश्रू
च्यतइतिभावः॥ चतुर्थ्यर्थमाह॥ प्रार्थनामिति॥ कैंकर्यप्रार्थनामित्यर्थः॥ तत्स्वरूपंतत्तीयज्ञोकव्या
ख्यातए।वोक्तं॥ ननुनेयंतादर्थ्यचतुर्थीपनन्नतिपध्यंतशेषत्वविवक्षाक्रियते॥ नमस्वस्तीत्यादिसू
त्रेण॥ नमःशब्दयोगविहिताचतुर्थीत्नियमितियदुच्यते॥ नमःस्वस्तीत्यादिसूत्रेणाहिलक्षणप्रतिप
दोक्तयोःप्रतिपदोक्तस्यैवग्रहणमितिन्यायेननमःपदस्यग्रहणं॥ इहतुननमइत्येतत्पदं॥ अपितु
मःनेतिपदद्वयंसमभिव्याहारात्मकंवाक्यं॥ अतोनात्रनमःशब्दयोगविहिताचतुर्थी॥ किंतु
प्रपद्यइतिपूर्वखंडस्योत्तमपुरुषापेक्षयान्यांहंपदानुषंगविहितनादर्थ्ये चतुर्थ्येवमुक्तोपह
रिंभजेनिद्द्यादिवदिति॥ नमःशब्दार्थमाह॥ प्रबलतरेति॥ प्रबलात्रविद्यापंचत्वयात्पनिशायप्रबलौ
योविरोधिनोअहंमोकामयायंभोगइत्स्हकारममकाररूपोभगवदेकार्थकैंकर्यविरोधिनो॥ अविद्या
दीनांप्राप्यप्रतिबंधकत्वमात्रं॥ अहंमोकारममकारयोस्तुस्वरूपनाशकत्वमित्यनयोःप्रबलतरत्वं।
तथाहिस्मर्यते॥ वन्तरस्तुभवेन्मस्तुस्य चसंबल्लच्छाश्वतं॥ ममेतिच्यन्तरोमत्युर्नममेतिचाशाश्वतं।१४

तयोः प्रकृताणांप्रकृष्टनिवृत्तिं॥ सवासननिवृत्तमिति यावत्॥ आत्मात्मीयपदार्थस्यापास्वातंत्र्यस्वतोमति
।मेते स्येवैंसमीचीनबुध्यासात्रनिवार्य्यतइत्यादिकमत्रानुसंधेयं।अत्रकैंकर्याविर्भावस्यकैंकर्यंकेवलभ
गवदर्थतात्कारस्यचप्राप्यत्वात्॥ कैंकर्य्यप्राप्तिप्रति वंधकाविद्यानिवृत्तिरप्यर्थसिद्धा॥ अविद्यादि
स्वरूपंतुमन्त्राप्तिप्रतिवंधकेशिति पदव्याख्यानावसरेवक्ष्यते॥ अतएवभगवताभाष्यकृता द्वयार्थानु
संधानपरेगद्येउत्तरखंडार्थानुसंधानावसरे मनोवाक्कायेत्यादिचूर्णिकयाअकृत्यकरणाद्यखिलक
र्मनिवृत्तिः॥ अनादिकालप्रवृत्तीत्यादिचूर्णिया अविद्यानिवृत्तिः॥ मदीयानादि इत्यादिचूर्णिकयाप्रकृति
संवंधनिवृत्तिश्चप्रार्थ्यते॥ एवंपदार्थान्व्याख्यायास्मिन्मंत्रेपप्रवृत्तिनिमित्तंदर्शयन्नस्यप्रमाणसिद्धतामाह | रत्नेमंत्र
दशेत्यादि॥ एतान्दशदश्रसंख्याकानन्यूनाधिसंख्यावच्छेदामदशशब्दः॥ अप्यीनित्यस्थाणार्थं॥ अ
तएवनपुंसकसंख्योनपुंसकमनपुंसकेनेतिसूत्रेणनपुंसकेकशेषविधानेपि एतानितिपुल्लिंगनिर्देशः॥ तेना
दंअनुसंधानशीलंअनवरतमेतत्पर्यपरिशीलनपरमीसर्वः। मतेस्ताकीस्येतत्प्रलयः॥ अतएवेतानि त्यनम
ति तोनाव्ययेत्यादि ... द्वितीया॥ प्रापतेरष्टति॥ चकारएवकारार्थकः ज्ञायतएवेत्यर्थः॥ किंजाता
मंत्रमंप्रतिपाद्यःसर्वेश्वरएवसेनेत्याह॥ षडिति॥ षट्पदानियस्यसतथोक्तः॥ इदंचसमस्तपदोपलक्षणा॥ अनेनपद
संख्याकथनेनपूर्वखंडे श्रीमन्नारायणायेति संबुध्यंतपदकपद

मं० मिति योजनात्वेत्य व्याहारापेक्षया अन्याचार्यस्याभिमतेति द्योत्यते ॥ द्वयसंख्यानिमित्तमस्य दर्शयति ॥ द्वि
१५ खंड इति ॥ द्वौ खंडौ अंशौ यस्य स तथोक्तः उपायोपेयस्वरूपार्थाभेदाद्वाक्यद्वयात्मकमित्यर्थः ॥ अत्रैव द्विवाक्य
इति वक्तव्ये द्विखंड इत्येकप्रसक्तेर्वाचीखंडशब्दं प्रयुंजानस्यायं भावः ॥ अर्थैकत्वादेकं वाक्यमिति
न्यायेन द्वयस्य प्राप्यप्रापकभूतब्रह्मरूपैकार्थत्वादेकवाक्यं ॥ अवांतरार्थभेदाद्वाक्यद्वयात्मकत्वं चेति अ
सोक्तसकलाकारवैशिष्ट्यप्रमाणमाह ॥ अधिगतेति ॥ अधिगतः निगमो वेदो येन स तथोक्तः ॥ कठवल्ल्यु
पनिषत्प्रतिपाद्य इत्यर्थः ॥ तथा हि कठवल्ल्यामुच्यते ॥ स संबंधयस्य कद्रुचारो भवतीति ॥ एतत् द्वयार्थं शारीरं श्वेता
श्वतरैरुच्यते ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शर
णमहं प्रपद्य इति ॥ तत्र देवमित्यनेन श्रीमत्त्वमुक्तं ॥ देवत्वं हि श्रीसंबंधायत्तं ॥ अत्रपादे वत्स मम्युक्तिरिति ॥ आ
त्मबुद्धिप्रसादं आत्मनि स्वस्मिन् बुद्ध्यध्यवसायविशेषेण प्रसीदतीति तथोक्तं ॥ छांदसः कर्त्तरि क्तप्रत्ययः
बहुव्रीहिर्वा व्यधिकरणः ॥ समासप्रत्ययः ॥ एतेनैन नारायणपदोक्तं वात्सल्यादिकं ॥ यो ब्रह्माणमिति पूर्वार्द्धेन
स्वामित्वं चेति नारायणाय इत्यस्यार्थ उक्तः ॥ शरणं प्रपद्य इत्यनेन पूर्वखंडार्थ उक्तः ॥ मुमुक्षुरित्युत्तरखंडा
र्थः ॥ अत्रैवेत्यनीमेवमित्यनुक्तत्वादस्य मंत्ररत्नस्य देशकालाधिकारिप्रकारनियमाभावोऽत्र प्रसक्तो [illegible] सि
द्धः ॥ तत्रापि तेष्वप्यस्य सर्वप्रकारकरणवाचित्वेऽप्यत्र निःशेषप्रतिबंधकनिवृत्तिपूर्वकनिरतिशयानंद
करणमात्रवाचित्वं ॥ दुर्वृत्तो वा सुवृत्तो वा अतिपापप्रचारोऽपि मूर्खो वा धर्मशीलो वा ॥ नानुकूल्येन न १५

त्त्वं॥ द्वयेन मंत्ररत्नेन॥ ऋष्यादिष्व करन्यासं द्वयेन प्राप्नुयात्सुत॥ मानसं वाचिकं पापं॥ संसारार्णविम
ग्नानां मामुद्धर इत्यादिकं वचनजातं इहानुसंधेयम्॥ षट्पद इति निर्देशेन प्रणवेन सह सप्तपदात्मकस्य
त्रैवर्णिकाधिकारित्वे प्रणवसाहित्येन द्वयस्य [redacted] सर्वाधिकारित्वेपि वाक्यद्वयेनार्थ्यय
प्रतिपादकत्वविवक्षया नावन्मात्रेण द्वयशब्दप्रयोगान्वयत्वमुपपद्यत इति भावः॥ स्त्रीणां च सर्ववर्णानां
पुरुषाणां तथाद्विषुः। एवं ज्ञात्वाधिजप्तव्यं द्वयं नित्यम् तंद्रितः॥ श्रीमन्नारायणं ध्यात्वा तं जपेत्पुरुषोत्तममि
त्युक्तं॥ द्वयेन मंत्ररत्नेन इति मंत्ररत्ने द्वयशब्दप्रयोगश्चोपपद्यते॥ अतः प्रणवराहित्ये मंत्ररत्नस्य द्वयत्वमुपपन्न
तरम्॥ मंत्र इति विशेषोपादानं मंत्रेणापिमिति सामान्यनिर्देशात्सु मंत्रं द्वयत्वेन गोपयेत्॥ नापात्रे चास्य मु[illegible]
त्सृजेदित्याद्युक्तं गोपनीयत्वं द्योतयति॥ अस्य मंत्ररत्नस्य वहिर्देवसदनं दास्यामीत्यादेरिवानुष्टुप्प्रका
शकतया प्रागुक्तोनमपुरुषरूपमंत्रलक्षणवत्तयप्रपदनानुष्ठानांगत्वं व्यापयन्नस्यानुसंधानमुखे
नउत्तमपुरुषोक्ताधिकारिणां॥ प्रत्येकानुसंधानपरत्वं च प्रकाशयन् पूर्वोक्तपदार्थानुवादपूर्वकं वा
क्यार्थमाह॥ इशानामिति॥ इशानां जगतामधीशदयितां नित्यानपायां श्रियं संश्रित्याश्रयणोचिताखि
लगुणस्यांघ्री हरेराश्रये॥ इष्टोपायतयाश्रियाचसहितायात्मेश्वरायार्थये कर्तुं दास्यमशेषमप्रतिहतं

मं॰ नित्यं त्वहं निर्ममः ॥ ६ ॥ जगतां लोकानां इशानां नियंत्री अधिक ईशो नियंता अधिकः सर्वेश्वरः ॥ अपने
१६ नमि ..... रं कुरु स्वातंत्र्यं मुच्यते ॥ जगतामिति ॥ बहुवचनेन श्रुतिगतैं ?? शब्द विवक्षितं ॥ वैचित्र्यं विव
क्षितं ॥ अनेन विशेषणद्वयेन असेव्यानां जगतो विष्णुपत्नी इति श्रुतिः स्मारिता ॥ स्वप्रार्थमाह श्रियमिति ।
श्रि ॥ ञ सेवायामिति धातोः ॥ कर्मणि कर्त्तरि च व्युत्पत्त्या एतदुभयं श्रीशब्दार्थः ॥ अत्र श्रियते ऽ येतमैरिति
कर्मणि व्युत्पत्त्या सापराध चेतनश्रयणीयपोगिवात्सल्यादिगुणचतुष्टयमुक्तं ॥ श्रयते भगवंतं इति कर्त्तरि व्युत्पत्त्या स्वतंत्र भवति श्री
तितु वात्सल्यादिकमुक्तं ॥ सेव्यामिति वक्रव्येषु विस्तारे इति धातुभ्यो व्युत्पन्नाश्रीशब्दः ज्ञानः पदेन नियंतत्त्व वाचिनाश्रित
दोषापाकरणं ॥ तैर्विज्ञाप्यमानहितश्रवणं ॥ श्री श्रयणपरा कुसुखानामपि रावणादीनां ॥ विदितः स हि धर्मज्ञः शरणागत वत्सलः इत्यौपधिकं
कर्तुमित्युक्तरीत्या हितकथनं ॥ तेषं ज्ञानाध्यवसायादि गुणैर्वेधिनं चेत्येवं रूपं नियमनं विवक्षितं ॥ अत्र शृणातिहि नत्याश्रित
दोषानिति व्युत्पत्त्या शृणुहिंसायामिति धातुनाश्रित दोषापाकरणरूपनियमनमुक्तं ॥ श्रृणोत्याश्रित ज्ञापनमिति व्युत्प
त्या कवलश्रु धातुसिद्धमाश्रितहितश्रवणरूपनियमनं ॥ श्रावयति विमुखान्हितमिति व्युत्पत्त्या णिजंतश्रु धा
तुसिद्धं विमुख चेतनहितोपदेशरूपनियमनं ॥ श्रृणाति विस्तारयति गुणैराश्रितानिति व्युत्पत्त्याश्रु विस्तार इति
धातुसिद्धमाश्रितवर्द्धनरूपनियमनं च ॥ अत्र श्रृणाति निखिलान्दोषान् श्रृणाति च गुणैर्जगत् ॥ श्रीपते चा १६

विलोनि संश्रयते च परं पदं ॥ अपतिं श्रियमाणां च प्रणौति वृ एवतीमपीत्यादिकमनुसंधेयं ॥
नित्यानपायिनीं इति ॥ मनुपायानुवादः अपायो विश्लेषः ॥ तद्रहिता अनपायानि नित्यमनपायानि
ना नपापायापाया भावः अनपायः ॥ नित्यानपायोपेतास्वा इति वक्तव्ये हि वी ॥ तां नित्यसंश्लेषामि
ति वक्तव्ये नित्यं श्रीरनपायिनीति वचनं स्मारयितुं ॥ अन्वयोक्ते व्यतिरेकोक्तिः ॥ प्रायिकत्व
निवृत्तिपरत्वादुचितेति च नित्यानपायामित्युक्तं । अनपायशब्देन तां तानं तमहाविभूतिप
रमं मिति म्बो कौलरीत्या स्वरूपरूपविभवादिषु सर्वत्रान्वयोविवक्षितः ॥ नित्यशब्देन कालविवि
श्लेषासहत्वं सूचितं ॥ मनुपायअप्रधानोपायत्वावगमात् श्रीशब्दार्थानुरोधात् श्रीमदितिचारणप
विशेषणतया निर्देशासिद्धं तत्त्वमाः समाश्रयणं पुरुषकारत्वेनैवेत्यभिप्रेत्य तदाश्रयणं गत्वेत्यर्थः
अत एव गद्यभाष्यकृतो भगवन्नारायणेत्यादिनाश्रयमंश्रियचरणमुपगम्य ततस्तदनु त्वपापा
रमार्थिकभगवच्चरणारविंदेत्यादिना भगवंतं चरणमुपगतवंतः ॥ भगवत्समाश्रयणेऽपि तत्पु
रुषकारोपेक्षितः ॥ अत्र तु न तथा पुरुषकारांतरापेक्षेति श्रीमात्रोपादानाज्ञायते ॥ अस्याः खलु मातृ
त्वप्रयुक्तवात्सल्यात् पुरुषाकारो नापेक्षित इति भावः ॥ पुरुषकारेण भगवतः स्वातंत्र्ये निमग्नानमुत्ततो

मं
१७ गुणानाह ॥ आश्रयणोचितेति ॥ आश्रयणस्य उचिताः अनुगुणाः अखिलाः समस्ताः गुणा वात्सल्य
स्वामित्वादयो यस्य तथोक्तस्य ॥ आश्रितकार्यैकसौकार्यापादकाः ॥ आश्रितकार्यापादकेको सर्वे गुणाः
अखिलस्याशब्देन विवक्षिताः ॥ वात्सल्यादयो ज्ञानादयश्चाश्रयणोचिताश्चेति ॥ आश्रयणोचितेत्यनेन
पूर्वश्लोकोक्तः समुचितशब्दार्थो विवृतः ॥ आश्रयणोचितेत्यनेन विशेषणभूतायाः श्रियः पुरुषवता
देशानां गुणानामप्युपयोगविशेषः सूचितः ॥ नारायणपदं स्वार्थमाह ॥ हरेरिति ॥ हरिशब्देनोपा
यभावः सूच्यते हरति स्वाश्रितविरोधिन इति हरिरिति तदर्थः ॥ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः
॥ अंघ्री इति चरणशब्दार्थानुवादः ॥ अंघ्री इति द्विवचनेन साहित्यसौन्दर्यं सूचितं ॥ आश्रयेऽप्यव
स्थामीति प्रपद्य इत्यस्यार्थः ॥ उक्तार्थव्यवसायं कुर्विति विवरणात् ॥ इष्टोपायेति ॥ शरणशब्दार्थानुवा
दः ॥ इष्टोपायतयाभीष्टफलसाधनं नपात्तस्योपायतया वक्तव्ये इष्टोपायतयेत्युक्तेः फलमतउप
पन्नेरित्युक्तरीत्या प्रपत्तव्यस्य सकलसाधनत्वात् ॥ इष्टश्चासावुपायश्चेति कर्मधारयो वा ॥ अनेन सु
सुखं कर्तुमव्ययमित्युक्तरीत्या उपायस्य रागप्राप्तत्वं सुखरूपत्वं विवक्षितं ॥ कल्याणगुणविग्रहविशि
ष्टस्योपायस्य अत्र पदं ध्वनाकष्टगमनं पुनरावृत्तिलक्षणं ॥ कञ्जपोवासुदेवे भक्तिमुक्तिवीजमनु ११

तमभिसन्धायादिकमनुसंधेयं । इच्छेयापापतया आश्रयेति पूर्वेणान्वयः ॥ स्वाभिमतपुरुषार्थं वेदकोत्तर
खंडार्थमाह ॥ श्रियाचेति ॥ श्रिया च सहिता येति श्रीमच्छब्दार्थानुवादः ॥ श्रीशब्दार्थस्वरूपमत्रा
पि पर्योचितमनुसंधेयं । चकारेण पुरुषकारभूतायाः एवं श्रिय आप्यांतरभावः समुच्चीयते ॥ उत्तर
५ खंडनारायणपदविवक्षितमर्थमाह ॥ आत्मेति ॥ आत्मना आत्मेश्वरः आत्मेश्वरः ॥ तस्मै सर्वशेषित्वेइ
त्यर्थः ॥ प्राप्यविषयं कैंकर्यं हि स्वदत इति भावः ॥ कल्याणगुणविग्रहादिकमप्यत्र नारायणपदप्रति
पाद्यं गुणानुभवजनितप्रीतिकारितरतिरूपकैंकर्यं हि पुरुषार्थः चतुर्थ्यर्थमाह ॥ अर्थ्यपद इत्यादिना
नित्यमित्यनेनाऽपर्थी येषां प्रार्थये ॥ चतुर्थ्यास्तादर्थ्यप्रतिपादनमुखेन प्रार्थनायां पर्यवसानं ॥ अशेषमित्य
नेन चतुर्थ्याः अपि संकुचितवृत्तिसिद्धसर्वविधत्वकथनं अप्रतिहतमिति देशतः कालतश्च प्रतिहतिरहि
तमिति सर्वावस्थत्वोक्तिः ॥ अहमित्यर्थसिद्धकथनं ॥ तु शब्देनाऽधिकार्यंतरवैलक्षण्यमप्युच्यते ॥
तदेव वैलक्षण्यं नमः शब्दार्थकथनेन नरदर्शयति ॥ निर्मम इति ॥ अहं भोक्ता मम भोग इत्य
हंकारममकाररहित इत्यर्थः ॥ अनेन पूर्वश्लोकोक्तप्रबलतरशब्दार्थो विवृतः ॥ अहं निर्मम इत्य
नेन अशेषमप्रतिहतं नित्यं दासं कर्तुं अर्थये इत्यन्वयः ॥ अर्थये इति वर्तमाननिर्देशेन कैंकर्यस्य नित्य
प्राप्यत्वं संगम्यते ॥ कर्तुमित्यनेन प्रार्थनायाः उद्देश्यं संगम्यते ॥ निर्ममस्सन्नहमित्यनेन विरोधि निवृत्त्यनं

मं॰ रमेव वैकर्यपरत्वमिति सूच्यते ॥ भाष्यकारैर्गद्ये मनोवाक्कायैरित्यादिना मनसोऽर्थस्य प्रथममनु
१८ संहितत्वाच्च फलप्रार्थनायाः प्रागेव विरोधिनिवृत्तिरपेक्षितेति गम्यते ॥ ६ ॥ पूर्वोक्तोपायस्य शरणारु
चिपरिग्रहीतत्वप्रकाशकं चरमश्लोकं व्याचष्टे ॥ शरणाभिमतत्वं च शरणत्वेन स्वयं शरणागतिविधान
त्या पूर्वकं सर्वपापविमोचनोक्तेरेवावगम्यते ॥ चरमश्लोकता चास्य चरमोपायप्रतिपादकत्वात् ॥ न त्वस्यैव श्लो
कस्य चरमत्वात् । इतः ऊर्ध्वमपि बहूनां श्लोकानां सत्त्वात् ॥ मत्प्राप्त्यर्थतया मयोक्तमखिलं संत्यज्य धर्मं
पुनर्मामेकं मत्प्राप्तये शरणमित्यार्तो व्यवसायं कुरु ॥ त्वामेवं व्यवसाययुक्तमखिलज्ञानादिपूर्णो ह्यहं
रौ मत्प्राप्तिप्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथाः ॥ ७ ॥ धर्मशब्दार्थमाह ॥ मत्प्राप्त्यर्थतयोक्तमिति । मत्प्रा
प्तिरर्थः प्रयोजनं यस्य तस्य भावस्तत्ता तया मत्प्राप्त्यर्थतया ॥ मत्प्राप्तिफलकतया इत्यर्थः । मया पूर्वाध्याये
षु प्रतिपादितं न तु त्वया विशेषेण दृष्टं त्वया हि ॥ यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रप
न्नं इति सामान्येन पृष्टं ॥ यद्वा मत्प्राप्त्यर्थमित्यर्थः । अन्यथा विहितस्यायोगात् इति भावः । सर्वशब्दार्थ
माह ॥ अखिलं समस्तकर्मयोगज्ञानयोगादिकमिति यावत् ॥ धर्मं भक्तियोगं तस्यैव प्रकृतत्वात् सामान्यश
ब्दस्य प्रकृतविशेषपरत्वौचित्यात् ॥ मूले धर्मानिति बहुवचनश्रवणेऽपि पद्ये एकवचनं ॥ भक्तेरेव स्वसा
धनत्वं कर्मज्ञानयोगयोस्तु तदङ्गत्वमिति सिद्धान्तानुसारेण ॥ कर्मज्ञानयोः पृथगुपायत्वाभावात्तयो १८

रपितत्र तत्र मोक्षोपायव्यवहारस्तु ताभ्यां भक्तिः भक्त्या मोक्षः इति प्रमाणज्ञी मभिप्रेतस्य काममोक्षयोरेवसा
क्षात्पुरुषार्थत्वेपि तत्साधनभूतधर्मार्थाभ्यां समं चत्वारः पुरुषार्थाः इति व्यवहारात्। अत एवोभयपरि
कर्मितत्त्वांतरस्यैकांतिकात्यंतिकभक्तियोगैकलभ्य इति यामुनभगवत्पादसंक्षेपवचनं॥ मूले धर्मानिति
बहुवचनेन तु भक्तियोगस्यैकांतिकात्यंतिकभक्तियोः वद्धरसांडिल्यविद्यादि वैकल्पिकावांतरभेदान्निप्रा
यं॥ परित्यज्येत्यस्यार्थमाह॥ संत्यज्येति॥ समित्यनेन परीत्युपसर्गस्यार्थः उक्तः सम्यक्त्वं त्यक्तरुचिवासनाभ्यां
सह पुनःप्रसंगं त्यक्त्वा सर्पः॥ अत्र स्नात्वा भुंजीतेत्यादौ रागप्राप्तभोजनानुवादेन तस्य स्नानपूर्वकत्वनिय
मवत्॥ रागप्राप्तशरणवरणानुवादेन तस्य साधनांतरत्यागपूर्वकत्वनियमो विधीयते त्यागहेतुश्च तेषां
पारतंत्र्यस्वरूपविरुद्धत्वमेव न दुष्करत्वमात्रं अशक्तस्य च समर्थकारुणिकशरणवरणमात्रं ब्रह्मणपिपीलि
केष्वप्येकरीतं॥ तापत्रयानुरोपि वेदांतवाक्यात्समर्थकारुणिकं सर्वज्ञं पुरुषोत्तममवगम्य स्वाभिमतसिद्धये
तमेव स्वयमेव प्रपद्येत॥ ननु स्वरूपविरुद्धस्य कर्मयोगादेर्विषभक्षणवदनिष्टस्याप्राप्त्य एव त्यागः कथं
विधीयते प्राप्तेर्हि शास्त्रमर्थवदिति चेत् न॥ स्वरूपविरुद्धस्यापि मरणानुबंधियुद्धादेः क्षत्रियस्येव तं प्रत्यनुष्ठेयत्वेन निप
स्वामिवचनादनुष्ठेयतया प्राप्तिसंभवात्॥ ननु कर्मज्ञानादेः स्वरूपतस्त्यागं स्वत्यागस्यासमत्वात्तद्विधाना
त् स्वरूपेणानुष्ठीयमानेष्वेव कर्मस्नानादिषु फलसंगकर्तृत्वत्यागो हि सात्त्विकः किंचैवं प्रपन्नाधिकारिणां

मं. नित्यनैमित्तिकानुष्ठानं तु स्मृतवंधुवधभीता युद्धान्निवृत्तस्यार्जुनस्य स्थितोऽस्मि गतसंदेहः करिष्ये वचनं
१९ तवेति ।। पुनर्युद्धमोऽपि विरुध्यते ।। इति चेत्सत्यमेवं ।। सहकारित्वेन चेत्युक्तरीत्या कर्मणां ब्रह्मविद्यांगतया त्यागोऽपि
लोकसंग्रहमेवापि इत्युक्तरीत्या शरीरयात्राशेषतया च प्राप्तानां त्यागविध्यभावात् ।। यद्वा मयोक्तमखिलं ध
र्मं मत्प्राप्त्युपायतया मत्प्राप्तिसाधनत्वेनाकारितत्वात्संत्यज्य तत्र साधनत्वबुद्धिं संत्यज्येत्यर्थः ।। सर्वधर्मान्परित्यज्ये
त्यत एव परित्यागविधस्त इत्यादि विधिविशेषणभूता निरुपायस्य साधनत्वाकारपरतया योजनं तथा च प्रसिद्धं स्वरूपत
स्तेषामनुष्ठानं मत्प्राप्त्युपायत्वमननुमतमेव भवति ।। पुनः शाब्दस्त्वयं सम्यग्वक्ष्यमाणसिद्धोपायस्यापि सस्वधर्मस्य स
नातनं इत्युक्तरीत्या धर्मत्वेन प्रागप्रसक्त्याऽङ्गत्वेन तस्य स्वीकार्यत्वाभिसंधानात् ।। त्याज्यतया पूर्वोक्तेभ्यः सा
धनांतरेभ्यो वैलक्षण्यं द्योतयति ।। तमेव विलक्षणं स्वरूपानुरूपमुपायमाह ।। मामेकमिति ।। उपायमिति एकशब्दो
वधारणार्थकः ।। मामेव ये प्रपद्यंते ।। तमेव चाद्यं पुरुषं प्रपद्ये ।। इत्यादौ त्वविवाचाप्येवकारप्रयोगे कर्तव्ये
तत्स्थाने एकशब्दप्रयोगात् ।। तथा च मामेवेत्यर्थः ।। मामित्यनेनाश्रयणसौकर्यापादकवात्सल्यादिगुणवत्त्वं सूच्यते
।। मामेकमित्यत्र प्रतीतिविशेषः ।। अन्यथा अवसायं कुर्विति मुख्यतरपदेनानन्वयात् ।। यद्वा ।। अवसीयत इत्यवसायः ।। कर्मणि घञ्
प्रत्ययः अवसायविषयं कुर्वित्यर्थः ।। आर्त्तः उपायांतरशरणं दुष्करत्वस्वरूपविरुद्धत्वाभ्यां अत्यंतमनन्योऽनवान् मद्व्याप्तये
श्लो. कैंकर्यपर्यंताये मामेवैष्यसीति भक्तियोगफलत्वेन पूर्वमुक्तं कैंकर्यं मत्प्राप्तये शरणमुपाय इति मामेवावसायं कुर्विति संबंधः

अवसायं कुर्वित्यनेन व्रजेत्यत्र मध्यमपुरुषप्रत्ययो व्याख्यातो गतस्यार्थज्ञानार्थी इतिन्यायात् ॥ ज्ञानं चात्र साधनांतरप
रित्यागसन्निधिबलात् । सिद्धोपायविषयत्वाच्च ॥ अध्यवसायरूपमिति भावः ॥ कर्मादिषु परित्यक्तामुपायत्वबुद्धिं
मयि कुरुष्वेति हृदयं ॥ अत्र अवधारणार्थकेनैकशब्देन शरणं व्रजेत्युक्तस्य शरणवरणस्योपायत्वं व्यवच्छि
द्यते ॥ देवतांतरशरणप्रसक्त्यभावात् ॥ देवतांतरपरि[illegible]त्वाकारस्य मामित्यसाधारणविग्रहप्रदर्शनेन प्रतिषि
द्धत्वात् ॥ साधनांतरत्यागस्य प्रागेवोक्तत्वात् ॥ मामेवैष्यसीत्येव हि तत्पूर्वश्लोके प्राप्यतयोक्तस्य स्वस्यैवात्र मामिति
प्रत्यभिज्ञायमानस्य मामकत्वाभिधानेन प्राप्यभेदस्याप्यसिद्धत्वाच्च ॥ उपायास्वीकाररूपशरणवरणस्यैव परिशेषात् ।
अयमेवशब्दार्थो भगवद्भाष्यकारैरप्यादरात् सोपि पूर्णमनुस्तमस्मृत इति संप्रदायविद्भिर्मुख्यो [illegible]षाः ॥ अ
त एव शरणस्य साधनांतरत्यागविधिसिद्धनिरपेक्षोपायत्वमप्युज्जीवितं भवति ॥ अन्यथा शरणमात्रे चैवं येन ब्रह्मा
स्त्रसिद्धोपायस्यैवाभिधस्यमेवसादिति बोध्यं ॥ एवमधिकारिकस्य प्रतिपादकं पूर्वार्द्धं व्याख्याय ॥ अथ फलं पापमत्र शरणप
कस्य प्रतिपादकमुत्तरार्द्धं व्याख्यातुं त्वामित्यस्य प्रकरणलब्धमर्थमाह ॥ एवं व्यवसाययुक्तं त्वामिति मामेवोपायत्वे
नाध्यवसितवंतं अत एवासमर्थं मत्प्राप्तं त्वामित्यर्थः ॥ अनेन शरणवरणस्य सर्वमुक्तिप्रसंगपरिहारार्थं ॥ अधिका
रिविशेषणमात्रं नोपायमिति व्यंजितं ॥ फलनिमित्तयोरभावस्यैवाधिकारिविशेषणत्वोपपत्तेः ॥ न हि निमित्तफलका
मनातिरिक्तमपेक्षितं सर्वमुपाय इति ॥ अस्ति नियमः ॥ यज्ञधर्ममधर्मं च यस्य न सस्यान्नते उभे सस्यान्तेते उभे यस्य सा

मं॰ यन्त्यज्यमिन्त्यजेति सर्वत्यागमूलस्य प्रपदनस्यापि त्यागः स्मर्यते॥ येन प्रपदनेन त्यज्यसि तत्त्यज तत्र
२० साधनत्वबुद्धिं च परित्यजेत्यर्थः॥ येनेत्यत्र सर्वनाम्नस्तृतीयैवेति हेत्वर्थे तृतीया॥ हेतुं चात्र प्रयोजनत्वेन॥ अप
नस्य हेतोर्वसतीत्यादिवत्॥ तेन प्रपदनस्य त्यागकारणत्वात् प्रपदनानंतरं त्यागः॥ प्रपदनस्य त्यागपूर्वकत्वात्त्या
गानंतरं प्रपदनमिति परस्पराश्रयशंकाभिरस्ताविदितव्या॥ ननु सर्वोपायसाधारणोऽधिकारिनाना॥ अत्राऽप
धिकारफलस्वामित्वमभिमि॥ अत्र शंक्यते॥ किमिदं फलस्वामित्वं नाम फलशेषित्वं वा॥ फलाश्रयत्वं वा॥ फलभोक्तृत्वं
वा॥ फलसंबंधित्वमात्रं वा॥ फलेच्छा वा॥ नाद्यः प्रपन्नाधिकारिण्यव्याप्तेः॥ कैंकर्यरूपे फले स्वार्थत्वापरपर्या
यस्य शेषत्वस्य नमसा निवर्तितत्वात्॥ तद्द्वितीयः॥ वैश्वानरेष्टिपित्र्यजनाधिकारिण्यव्याप्तेः॥ वैश्वानरेष्टिजन्यब्र
ह्मवर्चसादिफलाश्रयत्वस्य पुत्र एव पितृयज्ञेजन्यस्वर्गरूपफलाश्रयत्वस्य पितर्येव च॥ सर्वविनाऽधिकारि
त्वेनाभिमतयोः पितृपुत्रयोरभावात्॥ अत एव न तृतीयोऽपि॥ नापि चतुर्थः॥ वैश्वानरेष्ट्यादौ पुत्रादेरप्य
धिकारितापत्तेः॥ नापि पंचमः॥ ज्योतिष्टोमादौ वज्जामधिकारिणाऽभावात्॥ ज्योतिष्टोमादौ शूद्राणाम
भिसस्त्यपतितादीनामप्यधिकारितापत्तेश्च॥ तेषामपि ज्योतिष्टोमादिसाध्यफलेच्छापाश्रपनिवार्यत्वात्॥ ननु
प्रवृत्तिप्रयोजकत्वं फलेच्छाविशेषणं॥ न त्विजां दक्षिणाव प्रवृत्तिप्रयोजका॥ ननु ज्योतिष्टोमसाध्यफलेच्छा
शूद्रादीनां सत्यपि फलेच्छा न प्रवृत्तिप्रयोजका॥ तेषां शास्त्रेण पर्युदासात् तत्राप्रवृत्तेरिति॥ उच्यते॥ स्वाभीष्ट २०

पापस्वीकारप्रयोजकफलेच्छावत्त्वं फलस्वामित्वमित्यनेन विवक्षितं ॥ प्रपन्नस्योपायगोचरचिकीर्षा
प्रपन्नयोरभावेपि स्वाभिष्टं प्रपत्त्युपायतया भगवतः स्वीकारोऽस्त्येव ॥ तत्र फलेच्छाप्रयोजिकैव ॥ अतो न तत्रा
व्याप्तिः ॥ सुहृदादीनां जीतिष्टोमादौ नोपायतास्वीकारवैश्वानरेष्ट्यादौ यजमानस्य पुत्रादिगतपूतत्वादिकं फलं
स्वीभीष्टमिति तदुपायस्वीकारस्तत्प्रयोजकफलेच्छावानस्तितेन न कुत्राप्यव्याप्त्यादिस्वीकारोऽपि प्रपद्यमानस्य
मीष्टं साधयिष्यतीति इति अध्यवसाय इति ॥ ननु शरणावरणस्यानुपायत्वे जेति विध्याद्यर्थविहितस्योपा
यस्य दुर्निरूपायपर्यायशब्दभावनानेयायिकादिभिः सर्वैर्दूषितत्वात् ॥ अपूर्वापरपर्यायस्यापि कार्यस्य च भगव
रै आज्ञारूपस्याधिकरणभाष्येन भगवदभिमतकार्यस्य दुर्निरूपत्वादिस्यादि ग्रंथेन तल्लक्षणतल्लिंगादिवाच्य
ता तान्भां सह निरस्तत्वात् ॥ अतो वत्त्व दनिष्टानुबंधित्वे इष्टसाधनत्वं कृतिसाध्यत्वादीनां लिंगाद्यर्थत्वं वाच्यं ॥
तथा च वैकर्म रूपरूपेष्टानुपायशरणव्रजनस्य पालयस्य कथमुक्तं विध्यर्थान्वयोपधात् ॥ न च कार्यत्वमात्रं
लिंगाद्यर्थः विनिगमनाविरहात् ॥ तथापि कार्यताज्ञाने प्रवृत्तौ जनयितव्यायां इष्टसाधनताज्ञानादेर्निष्फल
ताडनादौ प्रवृत्तिप्रसंगवारणाय कार्यताज्ञानसहकारित्वस्यावश्यकतया नाद्यसहकारिविरहेण शरणावर
णप्रवृत्त्यनुपपत्तेः ॥ किं च कार्यतामात्रस्य विध्यर्थत्वेन कलंजं भक्षयेदित्यादिनिषेधानुपपत्तिः ॥ कलंजभक्षणा
देरपि कृतिसाध्यत्वेन नञर्थेन सह बाधेनानन्वयात् ॥ उच्यते ॥ नयानां विध्यर्थत्वेपि नरकसाधनत्वेनादेव

मं० त्ववदनिष्टाननुबंधित्वस्यान्वयेनाधिकारिविशेषस्य कलञ्जवदनिष्टाननुबंधित्वज्ञानाभावेपिप्रवृत्तिवदि
२१ शारणावरणे इष्टसाधनत्वस्यान्वयेनाप्यधिकारिणा इष्टसाधनताज्ञानरूपस्य कार्याभावेपिप्रवृत्त्युपपत्तिः
भगवत्पादैस्तुधात्वर्थस्य कर्तृव्यापारसाध्यमात्रलिङादिधर्ममितिभाष्यमाणानां कार्यत्वमेवविध्यर्थ इत्युक्तता
त्पर्यं॥ नच विनिगमकाभावः॥ कृतिसाध्यत्वप्रकारकक्रियाविशेष्यकेच्छारूपचिकीर्षाद्वाराप्रवृत्तिजनकज्ञानविष
यस्यएवंविध्यर्थतयाचिकीर्षासमानप्रकारककृतिसाध्यत्वप्रकारकज्ञानस्यैवतद्वाराप्रवृत्तिहेतुत्वेनतद्विषयव
तिकृतिसाध्यत्वस्यैवविध्यर्थतौचित्यात्॥ अतोशारणावरणेविध्यर्थान्वयोपपत्तिः॥ नचैवमपिनकलंजंभक्ष
येदित्यादिनिषेधानुपपत्तिः॥ तत्रकलंजभक्षणप्रतियोगिकनिषेधविध्यर्थकार्यत्वान्वयोपयोगात्॥ यद्याप्यैवं
ग्निपकामस्यजुहुयादित्यादौलिङ्वाच्यस्यधात्वर्थान्वयकृतिसाध्यत्वस्यधात्वर्थेहोमघननक्षमसमानपदोपात्तत्वान्व
यः॥ धातोस्तुफलजनकारणस्य च्वःप्रकरणलभ्याश्रयानुवादकत्वमात्रं॥ तद्वदिहापिधातोस्समभिव्याहृतनञर्थ
प्रतियोगिसमर्पकत्वमात्रं॥ लिङ्वाच्यकृतिसाध्यत्वस्यतुनञर्थेनसहान्वयः॥ धात्वर्थविध्यर्थयोः पा
रा समानत्वमनियमस्यौत्सर्गिकस्यात्रापवादात्॥ नन्वीष्टसाधनताज्ञानाद्यभावस्यापिकारस्य काम्यविरहात्कथंशार
णावरणेप्रवृत्तिः॥ नचेष्टसाधनत्वाभावज्ञानाभावस्य कार्यताज्ञानसहकारित्वमितिवक्तुं युक्तं॥ एकत्रावृत्तेन
तस्योपादानं वारयताइष्टसाधनताज्ञानस्यैवेष्टसाधनत्वाभावात्॥ ज्ञानस्यापिधर्मस्मिन्पक्षेप्रवर्तनीयत्वा २१

लात्॥ इति चेत्॥ यैवं॥ प्रवृत्तिसव्यपेक्षज्ञानस्यैव प्रवृत्तिजनककार्यताज्ञानसहकारित्वाभ्युपगमा
त्॥ फलानुभूतावध्यवसायरूपे पंचारणागतिः॥ सिद्धोपायपसाध्यस्य फलस्याधिकारिविशेषणात प्राग्व्यव
स्यापेक्षणीयैवेति नात्र तदसंभवः॥ इममेवार्थमभिसंधायाचार्यैर्व्रजेत्सव्यवसायं कुर्वितिविवरणं क्रियते॥ तत्र कुर्वि
त्यनेन न साध्यत्वस्य लोर्थत्वं॥ अध्यवसायमित्यनेन तस्य धात्वर्थनिष्ठता च स्फुटमवगम्यत इति॥ अहं शब्दस्याविव
क्षितमर्थमाह॥ अखिलेति॥ अखिलशब्देन शक्त्यादिसंग्रहः॥ प्राप्तितत्कार्ययोः कज्ञानशक्त्यापशेषकस्यागु
णपरिपूर्ण इत्यर्थः॥ हि शब्देनोक्तगुणवैशिष्ट्यस्य वेदांतप्रसिद्धिर्द्योत्यते॥ सर्वपापेभ्य इत्यस्यार्थमाह॥ मत्प्राप्तीति॥
प्रापकप्रतिबंधकोपायांतरनिवृत्तिरधिकारिकृत्यत्वात्॥ प्राप्तिप्रतिबंधकैरित्युक्तं॥ प्राप्तिप्रतिबंधकपदेन पुण्यस्या
पि भगवत्प्राप्तिप्रतिबंधकत्वाविशेषात्॥ मूले पापशब्देन तत्क्रोडीकार इति विवक्षितं॥ अपलौकिके सत्यनिष्ठासाधारणंहि
पापं॥ अतएव श्रुतावपि सर्वे पाप्मानः प्रदूयंते॥ एवमेवीर्विदि पापं कर्म न लिप्यते॥ एष आत्मा अपहतपाप्मा एष स
र्वेभ्यः पाप्मभ्य उदितः इत्यादौ पुण्यपापयोर्द्वयोरपि पापशब्देन संग्रहः॥ प्रतिबंधकैरिति बहुवचनेनाविद्याकर्मवासना
रुचिप्रकृतिसंबंधाः॥ तदवांतरभेदाः॥ अज्ञानान्यथाज्ञानविपरीतज्ञानाभ्युपगमात्॥ प्रारब्धव्यतिरिक्तपुण्यपापरूप
पूर्वाघप्रमादिकोत्तराघरूपः॥ तत्राछेद्यके उयनादिहमनसाकृतानिलोकापवादभीत्याकरणपाकानुष्ठानान्यकिंच
नत्वप्रमाणानि सर्वाणीति विवक्षितानि॥ तत्राज्ञानं ज्ञानानुदयः॥ वासनाबुद्धिपूर्वकप्रवृत्तिहेतुसंस्कारविशेषः॥

भं० अज्ञानवासना कर्मवासना प्रकृतिवासना चेति सा त्रिविधा ॥ बुद्धिपूर्वकप्रवृत्तिहेतुस्सजातीयकर्मान्तरंभेष्व
२२ रुचिः ॥ सा च विषयभेदाद्बहुप्रकारा प्रकृतिसंबंधः स्थूलसूक्ष्मरूपात्संबंधः ॥ अनभ्युपगतप्रारब्धमेतद्देहानुभाव्य
प्रारब्धं ॥ तद्व्यतिरिक्तं पूर्वाघं अनभ्युपगतप्रारब्धं संचितं च अनभ्युपगतप्रारब्धं देहान्तरानुभाव्यप्रारब्धं प्रारब्ध
त्वेनाभिमतकर्मणां फलप्रदानोन्मुखत्वं ॥ संचितत्वं प्रवक्तकर्मनिरप्रतिबंधकेन फलोन्मुखत्वमिति विवेचनीयं ॥ अत्रे
दमनुसंधेयं ॥ मुमुक्षोः सर्वाण्यपि कर्माण्यकृतप्रायश्चित्तान्यनुभवैकविनश्यन्ति अवरपमनुभोक्तव्यंतु
तंकर्मप्रभुभाष्युमं ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि इति स्मृतेः ॥ मुमुक्षोस्साधनान्तरनिष्ठस्य कृत्स्न
मपि प्रारब्धमकृतप्रायश्चित्तं बुद्धिपूर्वकोत्तराघं च अनुभवविनाश्यं इतरत्सर्वं विद्याविनाश्यं ॥ तस्य तावदेव चिरं यावन्न
वत्तिविमोक्ष्येऽथ संपत्स्यत इति श्रुतेः ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ अना
रब्धकार्ये एव तु पूर्वे तदवधेः भोगेन त्वितरे क्षपयित्वाथ संपद्यत इति सूत्रकारवचनाच्च ॥ ज्ञानोत्पत्तेः
प्राचीनं कर्म पूर्वाघं तदुत्तरकर्मोत्तराघं प्रपन्नस्याधिकारिणस्तु दृप्तस्य अनभ्युपगतप्रारब्धमकृतप्रायश्चित्तं
बुद्धिपूर्वोत्तराघं च अनुभवैकनाश्यं ॥ अनभ्युपगतप्रारब्धव्यतिरिक्तं पूर्वाघं प्रामादिकं चोत्तराघमुपा
यविनाश्यं ॥ आर्तस्य तु सर्वमुपायविनाश्यं ॥ अत्र प्रमाणानि ॥ साध्ये नक्ति स्तुसाहं चीपारब्धस्यापि भक्षय
सी ॥ साध्या भक्तिर्यस्य साध्यभक्तिः ॥ भक्तिरिह कैंकर्यात्पूर्वभाविनी ॥ पुनर्विश्लेषभीरुत्वं परमा भक्तिरुच्य २२

तेइत्युक्तलक्षणा परमाभक्तिः॥ आर्त्तानामाशुफलदा सकृदेव कृता ह्यसौ॥ दृप्तानामपि जंतूनां देहांत
रनिवारिणी॥ यस्तु प्रारब्धदेहेपि शोचत्यार्त्तः स उच्यते॥ यः स्वदेहांतरकृते शोको दृप्तः स उच्यते॥ आर
त्तस्य यो विमुक्तस्यादेतद्देहेपि शोचनात्॥ दृप्तः प्रारब्धदेहांतं न शोचति ततः स्वयं देहांते मुच्यते सेषा मोक्षका
लव्यवस्थितिरिति॥ प्रारब्धेतरपूर्वपापमखिलं प्रायादिकं चोत्तरं न्यासेन क्षपयन्ननभ्युपगत प्रारब्धखंडं च
नः॥ धीपूर्वोत्तिरप्राप्य नाम जननात् ज्ञाते पितन्निष्कृतेः॥ कोटिं स्वे सति चित्तयाप्यजयत क्रोडीकरोति प्र
भुः॥ एवमाद्यभियुक्तैरुक्तं न जातमिहानुसंधेयं॥ मोक्षशब्दार्थमाह विरहितमिति॥ प्रसंगार्थमाह कुर्यामिति॥
अत्रापि परिगजनर्थकथनं सीजलुडर्थ उक्तः॥ शारीरगतमालिन्यनिरसने शारीरिणी इव स्वाश्रितविरोधिनिर
सनं स्वस्यैव प्रयोजनं इति ज्ञापनाय लुडर्थ प्रार्थनार्थकस्य लिङ उपादानं॥ मा शुच इत्यस्यार्थमाह॥ शुचं माकृ
था इति॥ शुचमिति पदस्यार्थः॥ उपायांतराणां स्वरूपविरुद्धत्वात् दुष्करत्वात् सापायत्वात् स्वस्वरूपानुरूपोपायांत
रादर्शनाच्च॥ परमपुरुषार्थदौर्लभ्यभियाशोको जातः॥ तन्निवारयति मा शुच इति॥ साध्योपायानां त्यागव
चनात्॥ उपायदोषकार्यशंका न कार्या॥ परिगृहीतोपायस्य सिद्धत्वात् सापायत्वशंका न कार्या॥ तस्य गुणावल
निरपेक्षत्वाभ्यां फलप्रदानशक्तिमत्त्वात् फलासिद्धिशंका न कार्या॥ सर्वपापविमोचनोक्त्या फलविलंबशंका
न कार्यं अतः शोको न कर्त्तव्य इति शोकनिषेधस्याभिप्रायः॥ कूले भग्ने तटाकस्य जलं निम्नदेशप्राप्तिव

मं॰ त॥ प्रकृतिस्थौ बंधकावित्युक्तौ॥ सत्यां मामेवैष्यसीत्युक्त्या नित्यसिद्धा भगवत्प्राप्तिः स्वत एव सेत्स्यतीत्यभिप्रा
२३ येण प्रतिबंधकनिवृत्तिरेव तदुपायकृत्यतया प्राधान्येनोक्ताः तथा हि श्रूयते॥ तद्यथा हिरण्यनिधिं निहितमक्षे
त्रज्ञा उपर्युपरि संचरंतो न विंदेयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्यः एतं ब्रह्मलोकं न विंदत्यनृतेन हि प्र
त्यूढा इति॥ ७॥ अथ प्रत्यक्ताविव समानुचरेति प्रतिषेधापायोगात्॥ शोकनिमित्तं तन्निवृत्तिप्रकारं च दर्शयन्
शिष्यशिक्षार्थं यावच्छरीरपातं निर्भरत्वानुसंधानं स्वानुष्ठानं दर्शयति॥ निःश्रित्य लब्धाधीनतां नापि स
त्कर्माद्युपायान् हरेः कर्तृत्वमनुमपि प्रपत्तुमनर्हत्सीदामि कुर्वाकुलमेतज्ज्ञानमनुपेयुषो मम मुनः सर्वापरा
धत्वापं कर्तासीति दत्तोऽस्मि तेऽनुचरं मत्वा कं स्मरन्नसारथेः॥ ८॥ हे हरे त्र्याश्रितत्रुपित   निवर्त्तकस
दा सर्वकालिकीं त्वदधीनः॥ त्वदधीनः तस्य भावस्तत्त्वं ता॥ त्वदापन्नस्वरूपस्थितिप्र   ॥   त्तिकर्ता॥ त्व
देकपारतंत्र्यमिति यावत्॥ मयि विषये तिष्ठिवत्यभिप्रायः॥ सप्तमे ध्यायेऽयं॥ भूमिरापोऽनलो वायुरित्यारंभ्याप
रेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां॥ जीवभूतामिति जीवसामान्यस्योक्तप्रकृतित्वाद्वा च्यलं चरीरवत्पारतं
त्र्यं तदंतर्गतस्य ममापि इदविशिष्टमित्यभिप्रायेण मयीतिनिष्ठेत्युक्तं॥ ममेति वक्तव्ये मयीत्युक्तिर्निष्ठा
या विषयत्वविवक्षया॥ कर्मादिचेष्टांते च तेऽपायाश्चतान् कर्माद्युपायान् कर्मयोग भक्तियोगानित्य
र्थः॥ तत्र कर्मयोगनाम स्वात्मस्वरूपतत्त्वनिर्णयांतरज्ञाननिष्पत्तये क्रियमाणं यज्ञदानतपःप्रभृतिकं कर्म २३
ति

तथाहि॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेन॥ कषायकर्मभिः पक्वे
ततो ज्ञानं प्रवर्त्तते॥ इयाज सोपि बहून् यज्ञान् ज्ञातव्यपाश्रयः॥ विद्यामधिष्ठायततुं मृत्युमविद्ययेति॥
तेन जितस्वांतस्य देहाद्यतिरिक्तपरिशुद्धात्मभावनात्मा ज्ञानयोगः॥ तेन सर्वाधिकारस्य तैलधारावदविच्छि
न्नदर्शनसमानाकारप्रीतिरूपापन्नास्मृतिसंततिर्भक्तियोगः॥ तदुक्तं॥ भगवद्यामुनपादैर्गीतार्थसंग्रहे॥
कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनं॥ ज्ञानयोगो जितस्वांतैः परिशुद्धात्मनि स्थितिः॥ भक्तियोगः परैकां मे
तप्रीत्याध्यानादिषु स्थितिरिति॥ सर्वेषां मोक्षोपायोक्तिः प्रमाणसिद्धमभिप्रायेति सदृष्टांतप्रायएवोक्तं॥ संध्या
हीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु इत्युक्तरीत्या कर्माद्यनुष्ठानयोग्यतापादकानां स्नानसंध्योपासनादिनि
त्यनैमित्तिकानां गीताचार्योक्तावताररहस्यज्ञानादीनां च यथासंभवं कर्मज्ञानादावेवांतर्भावः॥ अवतार
रहस्यज्ञानादीनां मोक्षोपायत्वोक्तिस्तु तेषां भक्त्यंगतया प्रधानफलेन फलवत्त्वाभिप्राया॥ एवंरूपान् कर्माद्युपा
यान् कर्त्तुमनुष्ठातुमशक्तं असमर्थः॥ स्वरूपविरुद्धत्वात्॥ दुष्करत्वात्॥ दुःखबहुलत्वात्॥ सापायत्वात्॥ स्वतः
फलासाधनत्वात्॥ सापेक्षत्वात् विलंबफलप्रदत्वात्॥ चिरकालसाध्यत्वात्॥ अनेकत्वाच्चेति भावः॥ क
र्त्तुं सकृदप्यनलं॥ वर्णाश्रमवत्त्वेन अभिमतफलसाधनत्वेन च शास्त्रचोदितत्वात् आप्ततमत्वेन लघूपदिष्ट
त्वाच्च॥ प्रत्यवायभयात्॥ अनुष्ठातुं चासमर्थः॥ भक्तियोगस्यांगभूतकर्मयोगज्ञानयोगादिकरणासंकरण

मं० सागात्॥ त्यागः सविशेषणो हीति न्यायात् भोजनपूर्वभाविन्या क्षुधा इव कैंकर्यभाविन्या भक्त्या स्त्यागायो
२५ गात्॥ प्रपत्तुमप्यनसंस्वरूपानुरूपत्वं सुकरत्वसुखरूपत्वमिरपायत्वसिद्धत्वस्वतः फलसाधनत्वमिरपे
क्षत्वाविलंबफलत्वैकत्वादिभिः॥ सुकरोपायश्शोकनिवृत्त्यर्थमभिहितेपि तदंगभूतसर्वधर्मत्यागस्याशक्य
त्वात्॥ रूपासत्त्वाभावात्॥ महाविश्वासाभावात्॥ सर्वधर्मत्यागांगिकांप्रपत्तिमकर्तुमसमर्थ इति निष्कर्षा
नुसंधानमुखेनस्माकिंचन्यकार्पण्यप्रदर्शिता॥ एवंभूतो हं दुःखाकुलः शोकाविष्टस्सन् सीदामि कृष्णशो भवा
मि॥ शोकनिरासायसुकरोपायस्त्वयाभिहितेपि ममबुद्धिमांद्यात्॥ शोक एव भव।तीति भावः॥ माशुचेत्येतद्व
चनेनमत्तेष्टप्राप्त्यंशाश्च विवक्षितः॥ कल्याणगुणवर्गो गर्भितः॥ तेन स्वकलोपायांतरेभ्योस्य सुकरत्वरू
पं वैलक्षण्यंद्योतयति॥ बालकांसवधान्भीन्वरित्यस्यास्य मादिवचः स्मरमं॥ उपायप्रतिपादकेष्वन्यग्रवाक्येषु
अनुत्तमं स्मरन्नज्ञानन् पुनः दृढं भिवृत्तावसादतयाभिभरः॥ कस्मिन्निमित्तमत्वाइत्यत्राह॥ एतत्सर्वं कि
मुपायत्वाध्यवसायरूपं ज्ञानं तत्पेक्षः त्वत्प्रसादादेव प्राप्नवत॥ ममसर्वपराधच्यंसमस्तत्वत्प्राप्तिप्रतिबं
धनिवृत्तिं कर्त्तासि करिष्यसीति विश्वासदृढोस्मीति संबंधः॥ अयं भावः॥ प्रागुक्तानां कर्मयोगाद्युपायांतराणां
पारतंत्र्यस्वरूपविरुद्धत्वादिपर्यालोचनयोत्पन्नापाः मानसव्यापायाः निवृत्तये सुकरस्वरूपानुरूपेचोपायत्वे
योपदिष्टे महाविश्वासाभावात्॥ दुष्करधर्मांतरत्यागांगकत्वाच्च॥ तत्राप्यनधिकारितयाशरीरसादपर्य २५

तेन महता शोकेनाविष्टस्सन्नः॥ मत्परं तेतान्यदित्यादिना गुरुत्वं भगवत्पार्थस्य विस्मरणात्॥ उक्तोपि सुकरमु
पायांतरमुपदिश्य शोकमपनेष्यसीति विवक्षया स्थितोस्मि॥ ततो भगवत्प्रसादात्सार्थ्यं स सारथ्यादिना भव
दीयाश्रितवात्सल्यसौशील्यसौलभ्यादिकल्याणगुणपूर्त्तिपर्यालोचनया भगवतोप्यधिकसुकरमुपायांत
रं शास्त्रविषाणाकस्यं सर्वज्ञेन भगवतापि दुर्वचनमिति तदेव वाक्यं चरमं तया निश्चितं सतं मेव सर्वधर्मस्या
गपूर्वकं स्वमुपायत्वाध्यवसायप्रापकत्वप्राप्तिप्रतिबंधकीभूतमदीयसर्वपापविमोचकं करिष्यामि सिद्धेति वि
श्वस्तोस्मीति पूर्वं प्राप्तिप्रतिबंधकत्वेन उक्तानां पुण्यपापानां अत्रापराधत्वेनोक्तेरयं भावः॥ भगवदनुग्रहस्या
णि पुण्यपापानि भगवदाज्ञारूपविधिनिषेधात्मकशास्त्रमयीदानुवृत्तिजन्यत्वात् तन्निवृत्तिश्च तत्तत्त्
मेव भवति॥ अत एवोक्तं॥ श्रीवत्सांकमिश्रैः॥ यल्लक्ष्मीयं तदिह पुण्यमपुण्यमन्यत्नान्यत्तयोर्भवति लक्षणमत्र
जातु॥ भूतोपितं तव हि यत्त किसरासगोष्ठ्यां तत्कीर्त्तनं परमपावनमामनंति॥ यद्ब्रह्मकल्पनियतानुभवेष्यना
श्यं तत्किल्बिषं सृजति जंतुरिह क्षणार्द्धे॥ एवं सदा केसेलजन्मसु सापराधं ब्रह्मस्य होतदभिसंधिविराम
मात्रादिति॥ स्वपराधेन प्रमादिकानां वुद्धिपूर्वकाणां केषांचिदुत्तराघानामश्लेषः॥ अप्रक्षुपगवप्रारब्धव्य
तिरिक्तपूर्वाघानां विनाशश्च विवक्षितः॥ तथा श्रुतयः॥ तद्यथा पुष्करपलाशा आपो न श्लिष्यंते॥ एवमे
वंविदि पापं कर्म न श्लिष्यते॥ तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन तद्यथेषीकातूल

मं
२५ मग्नेोप्रोतं प्रदूयते ॥ एवं हास्य सर्वे पाप्मानः प्रदूयंते ॥ तथा विद्वान् पुण्यपापे विधूय निरंजनः परं साम्यमुपैति
गभिधुनोस्मद्ये ग्रंथि छिद्यते सर्व संशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ तद्यथा पादोदरस्त्वचा
विनिर्मुच्यते ॥ एवं हैव सर्वपाप्मना विनिर्मुक्तः स साममिरुन्नीयते ब्रह्मलोकं ॥ स एष सर्वेभ्य पाप्मभ्य उदित ॥ उदितो
ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यादयः ॥ तत्रोत्तराघानामश्लेषणानामुत्पत्स्यमानप्रजननतराकृतिप्रतिबंधः
पूर्वाघानां विनाशस्तु तत्स्नायाः शक्तेर्नाशः ब्रह्म किं संबंधिनीनां कर्मणां भवे गोम्यिग्रहानुग्रहरूपत्वात्प्रमोक्ष
नासमुद्देशे न पनुषित् तत्संधानस्य रामवाणस्य तस्मिन्ननुजिघ्रक्षानंतरं तद्विरोधिमरुत्स्य तत्वतत्सुहृद
द्विषु संक्रमणं चाप्युपते ॥ तस्य पुत्रादायमुपयंति ॥ सुहृदः साधुकृत्यं द्विषंतः पापकृत्यं तस्य प्रियाज्ञातयः ॥ सुकृतम
नुपयंत्य प्रियाय दुष्कृतमिति ॥ सीदामि दुःखोस्मी सुभयत्रापि वर्त्तमानं निर्देशात् ॥ सावलोकनेनावसादे भगवद्गु
णावलोकनेन दावर्धचयावस्थरी रमनुवर्त्तनीयं इति सूचितं ॥ अत्र संतप्यमानमक्षगणं विचिंत्य तत्रस्यामि हि
तं भवति च विभावयामि ॥ आहुपमेव षम् शिशादयेजहि मामाश्री विषण्णहृतां केलिनिभामवस्थामिस्या घमि
पुनस्तं पोनुसंधेयः ॥ दृढोस्मी तम्ने न स्थितोस्मि गतसंदेहः ॥ इत्यर्जुन सेवस्यात्मनोपहता विश्वासूचितः ॥ अप
पातकभीतस्त्वं सर्वभावेन भारत ॥ विमुक्तान्यसभारं भो नारायणपरो भव ॥ इत्येवमेवत्तो जातानां भयसी जन्मसं
ततिः ॥ तस्यामन्यत मंत्रजन्मसंचितप्रसरणं व्रज ॥ तस्मात् मुमुक्षोत्सृज्य चोदनां प्रतिचोदनां ॥ इत्यादयश्चरमश्लोकार्थ
समानार्थकाः ग्रंथाश्चात्रानुसंधेयाः ॥ ॥ इति श्रीमत्सकुजतिलकवरदाचार्यसुमुना सोम्योपयंतृसूरिणा वि २५